220
128

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES No. 1364.

न्यायवार्त्तिकतात्पर्यपरिशुद्धिः ।

श्रीमदुदयनाचार्यविरचिता ।

श्रीवर्द्धमानोपाध्यायविरचित-न्यायनिबन्धप्रकाशाभिध-व्याख्यासहिता ।

NYĀYA-VĀRTTIKA-TĀTPARYA-PARISUDDHI

BY UDAYANĀCHĀRYA

With a gloss called Nyāya-nibandha-prakás'a by Varddhamānopādhyāya

EDITED BY

Pandit Vindhyes'varí Prasád Dvivedin

Librarian Govt. Sanskrit College, Benares.

AND

Pandit Lakshamana Sástri Drávida

Professor, Govt. Sanskrit College Calc

FASCICULUS IV.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS.

No. 5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1 PARK STREET.

1914.

वीर सेवा मन्दिर
दिल्ली

★

क्रम संख्या

काल नं०

खण्ड

'OR SALE

)F THE

)F BENGAL.

CACUTTA,

FROM

ERNARD QUARITCH,

LONDON, W., AND MR. OTTO

LEIPZIG, GERMANY.

*tterisk * cannot be supplied.—som*

it of stock.

IDICA.

s

.... Rs.	1	14
II, Fasc. 1-5 ; Vol. III.		
... .	14	6
... ...	2	0
... ...	2	0
... .	2	8
. ...	1	4
each	3	12
... ...	0	10
... ...	3	2
asc. 1-10 ; Vol II.		
. ... ..	20	0
@ /10/ each	1	14
se 1-5 (@ /10/ each ...	5	0
. ...	0	10
Bhatta Dipika Vol. I, Fasc. ..... , @ /10 each ...	4	6
Banddhastotrasangraha	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each	3	12
Çri Çantinatha Charita, Fasc. 1-3	1	14
Çatadūshaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each .. .	14	
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3	
Ditto Vol. VII, Fasc. 1 5 @ /10/	3	
Ditto Vol. IX. Fasc. 1-2	1	
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each	10	
*Çaturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...	36	
Ditto Vol. IV. Fasc. 7-8, @ 1/4/ each	2	
Ditto Vol. IV, Fasc. 9-10 @ /10/	1	
Çlockavartika, (English) Fasc 1 7 @ 1/4/ each	8	1
*Çrauta Sūtra of Çāṅkhāyana, Vol. I, Fasc 1 7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each	10	0
Çri Bhāshyam, Fasc 1 3 @ /10 each	1	14
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol I @ /10/ each	3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc 1-6 @ /12/ each	4	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	5	10
Kiranavali, Fasc. 1-2 @ /10/ each	1	4
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, fasc. 1 @ /4	2	8
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each	6	4
•Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each	2	8

जल्पौ सप्रयोजना"विति भाष्ये यद्यपि प्रयोजनमङ्ग-तया श्रूयते तथाप्यङ्गि प्रत्येतव्यं, तेनायमर्थो भाष्यस्य, प्रयोजनं तावद्वादजल्पौ व्याप्नोति वितण्डां तु व्याप्नोति न वेति चिन्त्यत इति विवरणार्थः ।

ननु वादजल्पयोः प्रयोजनवत्त्वसिद्धौ वितण्डाया-स्तच्चिन्त्येतापि, तयोरेव तु प्रयोजनवत्त्वं केन भाष्येण प्रतिपाद्यत इत्यत आह । तत्रशब्दार्थमिति । [३४।६] वक्ष्यति हि "पृथगुपदिष्ट उपलक्षणार्थमुपलक्षितेन व्यवहारस्तत्त्वज्ञानार्थं भविष्यती"ति, स च व्यवहारो हेत्वाभासेभ्यो हेतोर्विवेचनलक्षणोऽवान्तरप्रयोजनमपि असाधारणतयेह तत्रशब्देन भाष्यकारस्य विवक्षित-मतस्तदेव वार्त्तिककृता व्याख्यातमित्यर्थः ।

ननु तथापि तत्र-न्याये विवेचयितव्ये इति युक्तं

ननु "वादजल्पौ सप्रयोजना"विति भाष्यात्तयोरेव धर्मित्वं विचारे प्रतीयते तत्कुतो भ्रान्तत्वमाक्षेप्तुरित्यत आह । वादजल्पाविति ।

अङ्गं-विशेषणमङ्गि-विशेष्यम् । ननु वितण्डायाः प्रयोजनवत्त्व-विचारे वादजल्पयोः प्रयोजनोपन्यासोऽसङ्गत इत्यत आह । नन्विति । तथापि भाष्यकृता तयोस्तत्त्वनिर्णयविजयफलत्वमुक्तं न न्यायतदाभासविवेचनफलत्वमिति, तदभिधानमसङ्गतमित्यत आह । भाष्यकार इति शेषः । अवान्तरेति । तत्त्वनिर्णय-

वक्तुं, न हि न्यायाभास एव विवेकप्रधानमित्यत आह। न्यायाभास इति तु सन्निधानादिति। [३४।९]

तदनेन विचारविषयो विविच्य दर्शितः। परीक्षापूर्वरूपं संशयं दर्शयितुं तत्कारणतया व्याख्यातृविप्रतिपत्तिमाह। प्रतिपक्षेति। [३४।१२] परीक्षायाः प्रयोजनमाह। तत्र यदीति। [३४।१६] पूर्वपक्षः "तत्र केचि"-दिति। [३४।१९] सिद्धान्तः-परपक्षसाधनेति। [३४।२४]

यद्यपि परपक्षदूषणेनापि प्रयोजनेन वितण्डायाः प्रयोजनवत्त्वं सिद्ध्यति "यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजन"मिति (१) वचनात्। यदि च परपक्षदूषणमपि नाधिकुर्य्यात् तदा वैतण्डिक एव न स्यात्, तथाप्येतदेव स्वयं किञ्चिदप्यनधिगच्छतो न स्यादित्यतः पारिशेष्यादपि स्वपक्षसिद्धिमभिसन्दधानस्यैव प्रवृत्तिर्युक्तेत्याशयः।

विजयापेक्षयेत्यर्थः। सन्निधानादितीति। न्यायतदाभासयोरित्यत्र न्यायाभासस्यैव सन्निहितत्वादित्यर्थः। विचारस्य पञ्चाङ्गानि क्रमेण दर्शयति। तदनेनेति।

अतः पारिशेष्यादपीति। यद्यपि स्वपक्षसिद्धिमुद्दिश्य प्रवृत्तौ

---

(१) गौ० सू० १अ० १आ० २४सू०।

ननु नास्त्येवासौ वादी यः किञ्चिदपि नाभ्युपगच्छेत् अन्ततो नञर्थस्यैवाभ्युपगमात्, तदनभ्युपगमे तु किञ्चिदपि नाभ्युपगच्छामीत्येतदपि न ब्रूयात्, तस्मात्किमनेनासद्भावनेनेत्यत आह। नास्तिको हीति। [३४।२७] नास्तिको-माध्यमिकादिः॥

अनेन हि परपक्षो नाभ्युपगम्यते, न पुनः परपक्षप्रतिषेधोऽभ्युपगम्यत इत्यर्थः। तदिदमुक्तं परपक्षनिषेधमात्रप्रयुक्तः प्रवर्त्तत इति। [३४।२८]

तथाहि—नेदं जगदस्ति बाध्यमानत्वात्, नापि नास्ति प्रतीयमानत्त्वात्। नापि सदसद्रूपम् विरोधात्। नाप्यनुभयरूपं विरोधादेव, प्रतीतेश्चेति।

वैतण्डिकत्वव्याघातः स्वपक्षसिद्धिपरपक्षदूषणोद्देश्यकथाया जल्पत्वात्, तथापि परपक्षो ऽनेन दूषित इति मध्यस्थावगमस्यैव स्वपक्षस्योद्देश्यत्वमिति भावः। एतच्च प्रमाणाङ्गीकर्तृवैतण्डिकमधिकृत्योक्तं, माध्यमकादीन् प्रत्यग्रे वक्ष्यति।

ननु परपक्षानभ्युपगमप्रस्तावे प्रमेयमात्रदूषणो-द्भावनमसङ्गतमित्यत आह। नन्विति। नास्तिकोऽपि चार्वाकः स्वपक्षं भूतचैतन्याद्यभ्युपगच्छत्येवेत्यतो विशिनष्टि। माध्यमिकादिरिति। किमपि यो न मन्यते स नास्तिक उक्त इत्यर्थः।

दोषं निरस्यति। अनेन हीति। परपक्षनिषेधानभ्युपगमे ऽपि

ननु न हि यदेव प्रत्येति तदेवाभ्युपगच्छति तथा सति प्रतिवादिवचनार्थः प्रतीतश्चेदभ्युपगतः स्यादिति मतानुज्ञा निग्रहस्थानम्, अप्रतीतश्चेदज्ञानं निग्रहस्थानमित्यायातमित्यत आह। प्रतिपत्तिरभ्युपगमः। [३५।४] इह विवक्षित इति शेषः। तथाप्यभ्युपगमविषयत्वादेव न पक्षस्तस्य ज्ञाप्यत्वादित्यत आह। यद्यपीति। ३५।४] तन्नान्तरीयकत्वादिति। [३५।४] अभ्युपगमनान्तरीयकत्वात् ज्ञाप्यतायाः पक्षशब्देन सिद्धा-

---

तद्व्यवहारस्तज्ज्ञानमात्रात्, ज्ञानव्यवहारोऽपि तज्ज्ञानमात्रादिति, न किञ्चिदपि भक्त्वेनाभ्युपगम्यत इत्यर्थः॥

सामान्यस्य विशेषपरत्वे हेतुमाह। ननु न हीति।

मतानुज्ञेति। यद्यपि परस्यानिष्टभ्रमेणेष्टापादनं मतानुज्ञा न परपक्षाभ्युपगममात्रम् अन्यथा सिद्धसाधनमपि मतानुज्ञैव स्यात्। तथापि स्वसाधने परेण यन्मतं दूषणमुद्भावितं तस्य याऽनुज्ञा स्वीकारः तया हेतुभूतया यन्निग्रहस्थानं विरोधः स एव दूषणमित्यर्थः। प्रतिपत्त्यभ्युपगमशब्दयोः पर्यायत्वभ्रमं निवारयति। इहेति। सामान्यशब्दोऽत्र विशेषपरतयोक्त इति भावः।

ननु ज्ञाप्यस्यैव पक्षत्वे प्रकृते किं दूषणमित्यत आह। तथापीति। तच्छब्देन ज्ञाप्यपरामर्शभ्रमं निराकरोति। तन्नान्तरीयकत्वादिति। तथापि पक्षशब्देन कथं चतुर्वर्ग इत्यत आह।

न्तोऽत्र विवक्षित इत्यर्थः । असिद्धविरुद्धत्वादिदोषो वाद्युक्तसाधनविषय इति शेषः ।

(वादजल्पवितण्डानां सप्रयोजनत्वकथनम् ।)

अदृष्टान्तस्यापि साधनविकलादेः प्रत्यक्षविषयत्वादित्यतिव्याप्तिः आगमादिविषयस्यापि व्याप्तिग्रहण-

---

पक्षशब्देनेति । अभ्युपगमविषय इत्यर्थः । वैतण्डिकवाक्यस्यैवासिद्धत्वादिदोषोऽर्थ इति भ्रमवारणायाह । वाद्युक्तेति ॥

(वादजल्पवितण्डानां सप्रयोजनत्वकथनम् ।)

ननु चादृष्टान्तत्वमसिद्धं तस्य केवलान्वयित्वादित्यत आह । साधनविकलादेरिति । ननु तादृशस्यापि क्वचिद्दृष्टान्तत्वमेवेति नातिव्याप्तिः दृष्टान्तमात्रस्यैव वाऽत्र लक्ष्यत्वात्, नाप्यव्याप्तिरागमादिविषयस्यापि धर्मादेः सर्वज्ञज्ञानगोचरत्वात्, न च प्रवृत्तिनिमित्तनिर्वचनमिदं, यो दृष्टान्तः स एवं, न तु य एवं स दृष्टान्त इत्यभिधानात् । मैवम् । यदि प्रत्यक्षविषयत्वमेव दृष्टान्तत्वं तदा साधनविकलत्वादिग्रहेऽपि तद्व्यवहारः स्यात् तदग्रहे दृष्टान्तस्यापि तद्व्यवहारानापत्तिश्च । किं च विषयत्वस्यैव लक्षणत्वसम्भवे प्रत्यक्षेति व्यर्थं स्यात् । दृष्टान्तत्वस्य केवलान्वयित्वेन तत्र लक्षणानुपयोगश्चेत्याशयात् । आगमादीति । अदृष्टादे-

गोचरस्य दृष्टान्तत्वादित्यव्याप्तिः। ननु तथाप्यतिव्याप्तिरेवेत्यत आह। अत्र चेति। [३५।२६]

सम्मुग्धवार्त्तिकं विवेचयति। यत्तेषु तेष्विति। [३६।१]

अथ लक्षणसूत्रव्याघात एव कस्मान्न भवति यावता तदपि प्रत्यक्षाप्रत्यक्षसाधारणमित्यत आह। न तूदाहरणेति। [३६।२] साधारणं विशेषविषयतयापि शक्यं व्याख्यातुमित्यर्थः॥

तत्किमिदानीं भाष्यमलग्नकमेवेत्यत आह। तस्मादिति। [३६।४] ननु अनुमानात्को ऽपरो न्यायो येनानुमानाश्रयतामुक्त्वापि न्यायाश्रयतां दृष्टान्तस्य पृथगाह भाष्यकारः, वार्त्तिककारोऽपि तथैवानुमन्यत इत्यत आह। न्यायस्य पञ्चावयवात्मकस्येति। [३६।६] तथाप्याश्रयत्वं संयोगसमवायाभ्यां दृष्टान्तस्य न घटते वाक्यस्याऽऽकाशाश्रयत्वादित्यत उक्तं मूलमिति। [३६।७] तथाप्यनुमानाश्रयत्वं दृष्टान्तस्यासङ्गतं लिङ्गस्य पक्षाश्रयत्वात् ज्ञानस्य चाऽऽत्माश्रयत्वात्, अत उक्तमनुमान-

---

रपि दृष्टान्तत्वादित्यर्थः। य एवं स दृष्टान्त इति पक्षे दोषमाह। नन्विति। मुख्यार्थत्यागे निमित्तमाह। तथापीति। अनुमाननिमित्तत्वमाहेतीति।

निमित्तत्वमाहेति। "पूर्वं प्रत्यक्षदृष्ट"मिति यथाश्रुतं बह्वाकुलयतीत्यत उक्तं दृष्टान्तेति। [३६।९]

एवं च सत्यनुमाननिमित्तत्वात्पक्षस्यापि पृथक् विधानं स्यादिति न चोद्यं, सिद्धान्ताभिधानेनैव गतार्थत्वादिति। ननु शब्दे दृष्टान्तापेक्षा नास्त्येव "अग्निष्टोमेन यजेत स्वर्गकाम" इत्यादौ तमन्तरेणैव वाक्यार्थप्रतीतेः इत्यत आह। सम्बन्धग्रहणविषय इति। [३६।१०] सम्बन्धग्रहणविषयतामात्रेण दृष्टान्तत्वं विवक्षित्वेदमुक्तं, न पुनर्व्याप्तिलक्षणसम्बन्धविशेषग्रहणविषयतयेति।

ननु लिङ्गपरामर्शस्यानुमितेर्वा न दृष्टान्तजन्यत्वमिति व्याप्तिग्राहकत्वेन दृष्टान्तस्यानुमितिजनकत्वं वाच्यम्। तच्चायुक्तम्। अनागतस्यापि दृष्टान्तत्वात्। उदाहरणवाक्यादेव व्याप्तिग्रहसम्भवे दृष्टान्तानुपयोगाच्च। न च दृष्टान्तज्ञानस्य तन्निमित्तत्वं शब्दोपदर्शितव्याप्तौ तदसम्भवात्।

अत्राहुः। अनुमित्यनुकूलव्यापकताज्ञानस्य साध्यसाधनसामानाधिकरण्याधिष्ठानज्ञानजन्यत्वम् उदाहरणवाक्यात् परार्थानुमाने तत्सम्भवेऽपि स्वार्थानुमाने तदसम्भव इति तद्द्वारा दृष्टान्तज्ञानस्योपयोगः। यद्वा प्रत्यक्षेण व्याप्तौ गृह्यमाणायां दृष्टान्तज्ञाने सत्येव व्याप्तिर्गृह्यते। सामान्यशब्दस्य विशेषपरत्वव्याख्याने हेतुमाह। पूर्वं प्रत्यक्षदृष्टमितीति। सिद्धान्ताभिधानेनेति।

त्यभिप्रायः। यत्तु तत्प्रामाण्ये तद्विषयगोचरानुमानाभिप्रायेण दृष्टान्तापेक्षा आगमस्याप्यस्तीति केश्चिद्व्याख्यातं तत्पूर्वं ज्ञात्वाऽर्थं परस्मा आचष्ट इति वदता वार्त्तिककृतैवापास्तम्, अतस्तदुपेक्षितवानिति ॥

(इति दृष्टान्तनिरूपणम् ।)

ननु दृष्टान्तोऽपि सिद्धान्ताभिधानेनैव प्राप्त इति सोऽपि न वाच्यः। न च धर्मिलाभेऽपि लक्षणालाभ इति वाच्यम्। पक्षस्यापि लक्षणालाभात्। न च प्रतिज्ञोपनयननिगमनलक्षणैरर्थतस्तल्लक्षणं प्राप्तमिति वाच्यम्। उदाहरणलक्षणेन दृष्टान्तलक्षणस्याप्यातेपलभ्यत्वात्। अत्र पक्षस्यानुमान एवोपयोगो दृष्टान्तस्य तु मानान्तरेऽपीति कथनाय पृथगभिधानं दृष्टान्तस्य तु तत एव शब्दमूलकतापि दर्शितेत्येके। उक्ते प्रयोजनानुसरणं न तु प्रयोजनमस्तीत्येवाभिधानमतिप्रसङ्गादित्यन्ये। पक्षत्वस्याव्यतिरेकितया लक्षणाभाव इत्यपरे।

तत्पूर्वमिति। शब्दप्रामाण्यानुमाने दृष्टान्तापेक्षायां शब्द किमायातमित्यपि भावः।

(इति दृष्टान्तनिरूपणम् ।)

अत्रार्थाभ्युपगमयोर्गुणप्रधानभावस्य विवक्षातन्त्र-त्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वाऽर्थः सिद्धान्तस्तेन सूत्रभाष्यवार्त्तिकटीकासु मिथो न विरोधः। इदमित्य-म्भूतशब्दयोर्विशेषणविशेष्यभावभ्रमं निवारयति। इद-मितीति। [३६।१५] न तु पुरुषविशेषे व्यवस्थापय-तीति। [३६।२०] व्यवस्थाशब्दो न पुरुषविशेषाभ्यु-पगमनियममाह, किं तर्ह्यनभ्युपगमसमुच्चयं निरा-कुर्वन् स्वरूपनियममित्यर्थः। ननु वादादिप्रवृत्त्यर्थं प्रतितन्त्रसिद्धान्त एवोपयुज्यते तत् किमपरैरित्यत

अर्थाभ्युपगम इति। ननु वस्तुनि विकल्पाभाव एकस्य विरुद्ध-द्वयानात्मकत्वात्। अर्थस्याभ्युपगमानियतत्वादभ्युपगमस्य चार्थनि-यतत्वादभ्युपगमेनार्थोऽपि लभ्यत इत्यभ्युपगमस्यैव सिद्धान्तत्वाच्च। मैवम्। अभ्युपगमस्याप्यर्थनिरूप्यत्वाद्विनिगमकाभावात् द्वयोरपि तुल्यत्वाद्वाच्यतया सिद्धान्तपदं नानार्थम्। सूत्रं सिद्धान्तलक्षण-सूत्रम्, अत्र तथा सूत्राभावात्। ननु पुरुषविशेषेऽभ्युपगमव्यव-स्थितिः किमभ्युपगमव्यवस्थितिरेव न भवति येन न पुरुषविशेषे व्यवस्थापयतीत्युक्तमित्यत आह। व्यवस्थाशब्द इति। स्वरूपनिय-ममिति। इदमस्त्येवेत्येवम्भूतमेवेत्यर्थः। ननु वादादिप्रवृत्त्यर्थं सिद्धान्त इत्युक्त प्रतितन्त्रादिसिद्धान्तप्रवृत्त्यर्थं सर्वतन्त्रसिद्धान्त इति विरुद्धमित्यत आह। ननु वादादीति। नन्वेकसिद्धान्तपरि-

आह। तत्रेति। [३६।२६] ननु यत एव सर्वतन्त्रसिद्धान्तो न विप्रतिपत्तिविषयः अत एव न वादादिप्रवृत्तिहेतुरित्यत आह। तथा हीति। [३६।२७]

यद्यपि स्वरूपेण सर्वतन्त्रसिद्धान्तो न वादादिप्रवृत्त्यङ्गं तथापि प्रतितन्त्रादिसिद्धान्तोत्थापनद्वारा न्यायाश्रयतया चोपयुज्यत इत्यर्थः। एतेनैव प्रतितन्त्रसिद्धान्तप्रयोजनं कृतः प्रकटीकृतम्। किमाश्रयश्च न्यायः स्यादसति सर्वतन्त्रसिद्धान्त इति शेषः। अधिकरणसिद्धान्तप्रयोजनमाह। तथेति। [३६।२८] साध्यसामान्यव्याप्तं साधनसामान्यमिति साधनविशेषात्साध्यविशेषः कथं गम्यतेति योजना।

अयमर्थः अधिकरणसिद्धान्तेन हि फलेन विषयेण नाऽपक्षधर्मता फलवती विषयवती वा स्यात् तदभावे

ग्रहेऽपि वैयाकरणानामिव पुरुषशक्तिनिरूपणार्थमपि कथा भवत्येव। मैवम्। द्वयोरेकसिद्धान्तपरिग्रहे कथालक्षणाभावेन तात्कालिकविरुद्धार्थाभिधानस्य तत्रापि सत्त्वात्॥

एतेनेति। सिद्धान्तस्य न्यायाश्रयत्वव्युत्पादनेनेत्यर्थः। ननु सर्वतन्त्रसिद्धान्तप्रयोजने वक्तव्ये तत्सिद्धस्य धर्मिणः प्रयोजनाभिधानमयुक्तमित्यत आह। असतीति। सर्वतन्त्रसिद्धान्तधर्मिप्रयो-

तु सा निष्फला निर्विषया वा, तथा च व्याप्तिः सामान्यविषया सती केवला सामान्यमात्रमुपनीय कथं पक्षे व्यवस्थापयेत्। अव्यवस्थाप्य च कथं कृतार्था स्यात् तथा चानुमानमात्रमुच्छिद्येत । एवं च क्व न्यायः क्व वादादय इति। तस्मादधिकरणसिद्धान्तोऽपि पक्ष-

---

जनाभिधानेन तत्साधकस्य तस्यैव प्रयोजनमुक्तमित्यर्थः। ननु सर्वतन्त्रसिद्धान्तसिद्धो धर्मी यदि न स्यात् तदा किमाश्रयो न्यायः स्यादिति पूर्वानुषङ्गेणैवोपपत्तौ शेषो न युक्तः अन्यथा कथं चेत्यादिपूर्वफक्किकायामपि शेषो देयः स्यात्। मैवम्। अनुवृत्ते-रुपस्थिताध्याहाररूपतयाऽध्याहारसामान्यविवक्षया शेषपदेनाध्या-हाराभिधानात् साधनविशेषात् पक्षवृत्तेः साध्यविशेषः पक्षवृत्ति-रित्यर्थः। फलेन अनुमितिरूपेणेत्यर्थः। विषयेण साध्यरूपेणेत्यर्थः। व्याप्तपक्षधर्माद्दि लिङ्गात्प्रसिद्धबाधसहकृतादनुमितिर्भवन्ती यावत् पक्षतावच्छेदकसमानाधिकरणमप्रसिद्धं साध्यं यदि विषयी कुर्यात् तदा अनुमितिसामग्र्येवापर्यवसन्ना सती निष्फला निर्विषया चानु-मितिः स्यात्पक्षसाध्यसंसर्गसमानसंविल्लक्षणार्थस्यैवाधिकरणसिद्धा-न्तत्वादिति भावः।

तथा चेति। व्यक्तिसाधकानुमानमात्रमित्यर्थः। गोत्वादिसाध-कानुमानेषु पक्षधर्मताबललभ्यविशेषाभावादधिकरणसिद्धान्तसिद्ध-साध्यविशेषसिद्धया व्याप्तेरपि फलवत्त्वमुपसंहरन्नाह। तस्मादिति।

(इति सिद्धान्तनिरूपणम् ।)

धर्मताफलविषयतया ऽवश्यं व्युत्पादनीयो येन व्याप्तिरपि तत्सहाया सती फलवती स्यादिति ॥

(सिद्धान्तनिरूपणम् ।)

मुख्यमर्थं गृहीत्वा शङ्कते । नन्विति । [३७।४]
भक्त्या च वृत्त्या परिहरति । अवयवा इवेति । [३७।७]

नन्वत्रावयवशब्दो न द्रव्यसमवायिकारणवचनः, किन्तु समुदायिवचन इति पञ्चावयवसमुदाये प्रत्येकमस्त्येव समुदायित्वमिति शङ्कैवानुपपन्नेत्यत आह । मुख्यमिति । समुदायित्वं न तावदेककार्यारम्भकत्वं वास्यादावेककार्याभावात् संयोगानां बहुत्वात् । बहुत्वसंख्यायाश्चैकत्वे ऽपि तत्कार्यसन्देहे ऽपि समुदायित्वनिश्चयात् । नाप्येकधर्मवत्त्वम् एकत्रापि घटे एकरूपवत्त्वेन समुदायिव्यवहारापत्तेः । नाप्यनेकवृत्त्येकधर्मवत्त्व घटत्वात्मकतादृशैकधर्मवत्येकघटे तद्व्यवहारापत्तेः । न चापरघटापेक्षयैकघटे ऽपि तद्व्यवहारो भवत्येवेति वाच्यम् । तत्र समुदायिव्यवहारे ऽप्यवयवावयविव्यवहाराभावात् । तस्मान्न समुदायित्वमेवावयवत्वमपि तु द्रव्यसमवायिकारणत्वं द्रव्यसमवायित्वं वा अवयवपदस्य मुख्योऽर्थ इति तमादाय शङ्केत्यर्थः । टीकायां गगनगुणा इति गगनपदं स्वरूपमात्रकथनपरं प्रकृते गुणत्वस्यैव सामर्थ्यात् । नन्ववयवा इत्यनेनापि प्रतिज्ञादिष्ववयवपदस्य न मुख्यार्थत्वमुपपादितमित्यत आह । भक्त्येति । तात्पर्यं हि वृत्तिमात्रनिर्वाह्यं भक्ति-

भक्तिमाह । यथा होति । [३७।७] क्रियोदाहरणं सोमेनेति, सोमपदस्य कर्मनामधेयत्वात् । धात्वर्थमात्र-

---

रपि वृत्तिर्भवत्येवेति तयैव तन्निर्वाह—इति भावः । एतावतैव दूषणे निरस्ते किं यथा होत्यादिनेत्यत आह ।

भक्तिमिति । उभाभ्यामुख्यगौणाभ्यामभज्यत इति भक्तिर्गौणी वृत्तिः । सा च मुख्यामुख्यसाधारणधर्मं विना न स्यादिति तत्कथनमित्यर्थः । सोमपदस्येति । कर्म यागादिरूपक्रिया यथोद्भिदा यजेतेत्यत्रोद्भिदपदं यागविशेषस्य नाम, तथा सोमपदमपीति याग एवात्र विधीयत इति प्राधान्येन क्रियैव वाक्यार्थ इत्यर्थः ।

ननु सोमपदं लताविशेषस्य वाचकं न तु यागरूपक्रियावाचकं तथाहि—"ज्योतिष्टोमेन यजेत स्वर्गकाम" इत्यनेनाधिकारसम्बन्धबोधने यागस्वरूपप्रतीतावप्युद्देश्यविशेषस्य नियोगसाधनीभूतभावनाविषययागरूपस्यानुपस्थितेर्न सोमगुणविधिः अत एव विशेषोपस्थितौ वाक्यभेदापत्तिः यागसोमयोः प्रत्येकं विधानादिति सोमेन यज्यर्थेन च प्रत्ययार्थो नियोगसाधनीभूत भावन विशेष्यत एव, विशिष्टविधिरेवायं, सोमस्य तु क्रियाद्वारा भावनान्वय इति करणत्वं तस्माद्विशिष्टविधावपि करणस्योपसर्जनत्वात् क्रियाप्राधान्यं न तु सोमरूपक्रियाविधानात् ।

अत्राहुः । विशिष्टविधौ गौरवात् प्रत्येकविधौ वाक्यभेदादुद्भिदा यजेजेतिवत् सोमपदस्य कर्मनामधेयत्वेनैवान्वयः । न च सोमस्य

विवक्षया तु कारकपदात् पृथगभिधानम्। वस्तुतस्तु सोमस्यापि कारकत्वमेव, गोदोहनेनेति कारकोदाहरणं प्रणयनस्य वाक्यान्तरप्राप्तत्वात्। प्रातिपदि-

स्वर्गसाधनत्वात् करणत्वमिति न कारकोदाहरणाद्भेद इत्यत आह। धात्वर्थेति। तेन कारकपदं धात्वर्थातिरिक्तकारकपरमित्यर्थः। यद्यपि सोमपदं न धातुस्तथापि सोमार्थवाचकयजिपदस्य धातुत्वमिति भावः।

प्रणयनस्येति। "चमसेनापः प्रणये"दिति वाक्यान्तरेणापां प्रणयनं प्राप्तमित्यर्थः। नन्वत्रापि क्रियैव वाक्यार्थः गोदोहनस्य सिद्धत्वेनाविधेयत्वात्। प्रणयनोपरागेण तद्विधिरिति चेत्। विभागस्तर्हि विधीयतां स च क्रियाविशेष एव गुणोपधानयोग्यः। अपि च न विधेयतया वाक्यार्थत्वमपि तु विशेष्यतया, अन्यथा सर्वत्रानुवादे वाक्यार्थालाभापत्तेः। मैवम्। सामान्यतः प्रणयनक्रियाविशेषस्यापि प्राप्तत्वात्। तथा च विशेषकापेक्षायां लोकसिद्ध एव गोदोहने तत्साधनत्वविधिर्लाघवात्। विधेयत्वे च विशेष्यत्वस्यैवोक्तत्वात्। यत्रापि गुणविधिर्दध्ना जुहोतीत्यादौ तत्रापि प्राप्तस्य होमस्य किं साधनमित्यपेक्षायां होमसाधनत्वेन दध्नो विशेष्यत्वात्। अन्यथा विशिष्टविधिसाङ्कर्यापत्तेः। विनिगमकाभावात्। सर्वेषामेव विशेषणत्वं विशेष्यत्वं च क्रिया वेत्यादिना च तात्पर्यविषयोऽभिहितः विशेष्यनानात्वेऽपि न वाक्यभेदः एकस्मिन्नेव तात्पर्यादित्यन्ये। प्रातिपदिकेति।

कार्थोदाहरणं यस्येति, व्रात्यशब्दस्यार्थवतोऽधातुप्रत्यय-रूपत्वात् । तथापि न समूहो व्युत्पादित इत्यत आह । तदनेनेति ।

ननु विशेषप्रत्ययहेतवोऽवाक्यभूता अपि सन्तीति अनेनाभिप्रायेण पृच्छति । क इति [३६।१७] प्रत्ययस्य

ननु भावनैव सर्वत्र वाक्यार्थः आख्यातजनयितव्ये ज्ञाने पदान्तराणां जनकत्वं न तु स्वातन्त्र्येण, तथैव व्युत्पत्तेः । यदाहुः "यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयोक्तव्य" इति । मैवम् । काञ्च्यां त्रिभुवनतिलको राजेत्यादौ वाक्यार्थबुद्धेः प्रत्यक्षसिद्धत्वाद्व्युत्पत्तेरसिद्धेः क्रियाध्याहारे च मानाभावात् । अभिधानाभिधेयापर्यवसानात् तदभावेऽप्यध्याहारे वाक्यापरिसमाप्तिप्रसङ्गात् । श्रुतान्वयस्य निराकाङ्क्षत्वेनाक्षेपस्याभावात् अन्यथाऽतिप्रसङ्गात् । न च कार्यपराणामन्वितं शक्तिकल्पनात्तथात्वमिति वाच्यम् । अन्वितमात्रशक्त्यैवोपपत्तौ कार्यांशेऽपि शक्त्यभावात् । कार्यान्वितबुद्धेश्च कार्यवाचकलिङादिपदसमभिव्याहारेणाप्युपपत्तेरन्यलभ्यत्वात् । न च प्रवृत्तिहेतुतया तस्मिन्नेवोपस्थिते तद्वानस्यानुचितत्वात्तत्रैव शक्तिरिति वाच्यम् । एवं प्रवृत्तिविशेषहेतुत्वेनोपस्थिते घटानयनकार्यताबुद्धावेव शक्तिकल्पनापत्तेः । प्रवृत्तिसामान्यस्य तद्विशेषं विनाऽनुपस्थितेः । अन्यलभ्यत्वात्तु तत्त्यागः प्रकृतेऽपि समान इत्यादि विस्तरो वक्ष्यते । प्रश्नपरत्वव्याख्यानबीजं लक्षणे ऽनुपपत्तिमाह । नन्विति । प्रत्यय इत्यस्य प्रत्ययमान

प्राधान्यं निराकुर्वन्नेव प्रत्ययपदोपादानप्रयोजनमाह। न च तदिति। [३७।१८] विशेषणासिद्धिं परिहरन्नाह। प्रतीतिश्चेति। ३६।२०]

अथानुभव एव कस्मान्न भवति न ह्यन्त्यपदं नानुभूयत एव तथा सति स्मर्येतापि कथमित्यत आह। न हीति। [३६।२२] तथाप्येवम्भूतस्यापि पदस्य स्मृतिरनुभूतिमन्तरेण न स्यादित्यत आह। सम्भवन्ति त्विति।

इति व्याख्याने हेतुमाह। प्रत्ययस्येति। पदानि प्रतीयमानानि वाक्यार्थबुद्धौ कारणानीत्येवं व्याख्यातमित्यर्थः। प्रत्ययपदेति। प्रत्ययपदेन विना प्रतीयमानत्वं पदानां न लभ्यत इति प्रत्ययपदं न व्यर्थमिति भावः। प्रतीत्युपपादनोपयोगमाह। विशेषणेति। प्रतीतिं विना प्रतीयमानत्वस्य विशेषणस्यासिद्धिरित्यर्थः॥

अप्रसक्तप्रतिषेधमाशङ्क्याह। अथेति। अनुभव एवेति। तेनाग्रे स्मृत्यनुभवसमुच्चयः प्रतीत्यङ्गमिति शङ्का निरवकाशेति भावः। स्वकार्यसंस्कारविरोधिनीनामित्यत्र टीकायां बहुधा स्मृतिषु पटुतरस्मरणदर्शनात् स्मृत्यादिसंस्कारो जन्यते तेन स्मृतिर्नाश्यत इति तात्पर्यम्। अन्यत्र तु स्मृतेरुत्तरस्मृतिरेव नाशिकेति मन्तव्यम्॥

ननु क्रमेणानुभूतेषु वर्णेषु क्रमेणैव स्मृतिर्न त्वेकदा, न चैकस्य स्मृत्यनुभवरूपत्वं शङ्कास्पदं, स्मृतित्वानुभूतित्वयोर्विरुद्धजात्योरेकत्वाऽसमावेशादित्यत आह। कारणसमुच्चयेति। कारणयो-

अस्तु तर्हि तदनुभव एव प्रतीत्यङ्गमित्यत आह । न चैत इति । [३७।२२] तदनेनानुभव एवार्थप्रतीत्यङ्गमिति निरस्तम् । अनुभवस्मृतिसमुच्चयं निराकरोति । न च पूर्वेति । [३७।२२] स्मृत्यनुभवयोस्तु स्यात्सहभाव इत्यनुषङ्गनीयम् । एतच्च वर्णानुभवान्तरालस्मृत्यभ्युपगमेन द्रष्टव्यम् । यदि तु वर्णानां निरन्तरोत्पादवतां निरन्तरा एवानुभवास्तदा विनश्यदविनश्यदवस्थयोरुपान्त्यान्त्यानुभवयोरेव सहभावः शङ्कनीयो निराकरणीयश्चोक्तयुक्त्याऽतो न पृथगाशङ्कितष्टीकाकृता । कारणसमुच्चयवशाद्विषयसमुच्चयवतः प्रत्ययस्वरूपसमुच्चयं परस्वीकृतं शङ्कते । न च पूर्वेति । [३७।२५] निराकरोति । सम्बन्धेति ॥ [३७।२८]

श्रोत्रसंस्कारयोः समुच्चयात् । विषयसमुच्चयवतः—सदसद्वर्णविषयवतः, प्रत्ययस्यस्वरूपसमुच्चयः स्मृत्यनुभवरूपत्वं परेण शङ्कितमित्यर्थः । सम्बन्धसंवेदनेत्यत्र टीकायां सम्बन्धसंवेदनं—सङ्केतानुभवः । यदा विचित्रप्रत्ययात् संस्कारोत्पादस्तदैव सङ्केतविषयसंस्कारस्योद्बोधस्ततो यदैव सङ्केतस्मृतिस्तदैव स्वजनितसंस्कारेण विचित्रप्रत्ययनाशात् तदुत्तरक्षणे पदार्थस्मृतिर्न स्यात् विचित्रप्रत्ययस्य नष्टत्वादित्यर्थः । नन्विदमयुक्तं संस्कारे जन्यधर्माभावाद्विचित्र-

यद्यपि सहकारिलाभादपरः संस्कारस्योद्बोधो नाम नास्ति, तथापि न यः कश्चित्प्रत्ययः सहकारी सर्वसंस्कारोद्बोधे सर्वस्मृतिप्रसङ्गात्, नापि सङ्केतविशेषस्मरणे पदैकदेशवर्णानुभवस्तत्संस्कारस्य सहकारी, तथा सत्यतिप्रसङ्गात्। तस्मात्पदत्वेन प्रतिसन्धानमेव समयस्मृतिहेतुसंस्कारसहकारीत्युपगन्तव्यं, तथाचैकप्रघट्टकेनापि विचित्रज्ञानेन विषयीकृता वर्णाः

प्रत्ययरूपसहकारिलाभ एवोद्बोध इति तज्जन्यसंस्कारकाल एव सङ्केतस्मृतिस्तत्काले च विनश्यदवस्थो विचित्रप्रत्ययोऽस्त्येवेति स एवाग्रिमक्षणे पदार्थस्मृतिं करिष्यतीत्युपपत्तेरित्यत आह। यद्यपीति।

तस्मादिति। ननु पदत्वं न तावदेककार्यत्वं यत्किञ्चिदेककार्यस्यातिप्रसञ्जकत्वात्। नापि पदार्थस्मृतिरूपैककार्यत्वं, अन्योन्याश्रयात्। सङ्केतग्रहे हि पदत्वग्रहः पदत्वग्रहे च सङ्केतग्रहः। नाप्येककालत्वैकदेशत्वाभ्याम्, अतिव्यापकत्वात्। नाप्येकधीमात्रगोचरत्वं नदीदीनादावतिव्याप्तिकत्वात्। नापि तत्तत्क्रमवद्वर्णत्वम्, एकवर्णके पदे तदभावात्। अत्राहुः। समयावच्छेदकरूपवत्त्वमेव पदत्वं, समयसामान्यग्रहश्च समयविशेषस्मृतिहेतुरिति नान्योन्याश्रयः। वस्तुत एकं ज्ञानं विचित्रं जातिसाङ्कर्यादेव न सम्भवतीति भावः। एकप्रघट्टकेनापीति। एकदैकेनापीत्यर्थः।

खण्डशः पदभावेन प्रतिसन्धेयाः अर्थसम्बन्धत्वेन स्मर्त्तव्या इति कुतोऽनुभवावकाश इत्यर्थः ।

प्रक्रिया तु अन्त्यवर्णानुभवस्योत्पादः तत्संस्कार-पदत्वप्रतिसन्धानयोरुत्पद्यमानतेत्येकः कालः । अथ तयोरुत्पादः स एव पदप्रतिसन्धानात्मा समयसंस्कारो-द्बोधः सम्बन्धस्मरणस्योत्पद्यमानता संस्कारोद्बोधाद्वि-चित्रप्रत्ययस्य विनश्यत्तेत्येकः कालः । अथ सम्बन्ध-स्मरणोत्पादः विचित्रप्रत्ययस्य विनाशः पदत्वानुसन्धा-नस्य विनश्यत्तेत्येकः कालः । न चैतद्दृष्टं कल्पन-मित्याह । अत एवेति । [३८।२]

खण्डश इति । देवदत्त ! गामानय दण्डेन शुक्लामिति वाक्ये तत्त-त्पदे ज्ञाते ऽपि तत्तत्पदार्थस्मृतेरप्यन्तरितत्वादन्ते पुनस्तत्तत्पदानां सम्भूय स्मरणात्तत्तत्पदार्थस्मृतिरिति खण्डश उपस्थितिरित्यर्थः ।

ननु वर्णानुभवे ऽपि तत्तत्क्रमाननुभवात् कथं पदप्रतिसन्धानम् । न चान्त्यवर्णानुभवानन्तरं पूर्ववर्णप्रध्वंसरूपः क्रमोऽनुभूतस्ततः क्रमस्मरणमिति वाच्यम् । यथोक्तप्रक्रियाविरोधात् । अत्राहुः । पूर्ववर्णध्वंसविशिष्टोऽपरवर्णः स चापरवर्णानुभवकालेऽनुभूयते । न चान्त्यवर्णेन पूर्ववर्णविनाशादन्त्यवर्णानुभवकाले पूर्ववर्णध्वंसो नास्तीति वाच्यम् । अन्त्यवर्णस्य क्रमेणानेकस्योत्पादनात् । न चैत-

नन्वेकप्रघट्टकेन विचित्रप्रत्यय एवानुसन्धानात्मा भविष्यति, करिष्यति च समयस्मृतिं तथाविधाम्, अन्यथा पूर्वस्मृतिरशेषपदावगाहिन्येकैव स्वीकर्त्तव्येत्यत आह। एवञ्चेति। [३८।४] अनुभूतं हि प्रतिसन्धीयते न तु प्रथमत एव, तथा च पूर्ववर्णानामनुभूतत्वेन पदत्वानुसन्धानसम्भवेऽपि अन्त्यवर्णस्याऽननुभूततया नान्त्यपदप्रतिसन्धानसम्भवः। न चानुभवानुसन्धानयोरेककालता कार्यकारणभावात्। तस्मात्तदनन्तरमेव पदत्वानुसन्धानमिति सुष्ठूक्तं पदार्थप्रत्यायन एव पदानुभवो न कारणमिति, तदौपयिकस्मृत्युत्पत्तौ तु कारणमेवेति।

अवधारणादीत्यत्रादिशब्देन तेषां स्मरणं विवक्षितं, प्रकरणादयस्तु योग्यताविशेषत्वात्तत्रैवान्तर्भूता इति

दिति। अन्यत्र स्मरणात्मकस्यैव प्रतिसन्धानस्यान्वयबोधकत्वदर्शनादत्रापि तथैव कल्पत इत्यर्थः।

अन्यथापीति। सिद्धान्तेऽपीत्यर्थः। पदानुभवः पदार्थप्रत्यायने न कारणमिति सिद्धवदुक्तमुपपादयति। अनुभूतं हीति।

तेषां-पदानाम्। प्रकरणादय इति। वक्तृश्रोतृबुद्धिस्थता-प्रकरणम्। तच्च यद्यपि सर्वत्र वाक्यार्थज्ञाने न हेतुस्तथापि नानार्थ-

तत एव वाक्यार्थप्रतीतेरुपपत्तेरनुपपत्तौ त्वसिद्धि-र्लक्षणस्य दोष इत्याशयः ।

ननु क्रमानुभूतानामप्येकस्मृतिसमारोहो भवत्येव, किं तु पदानि क्रमेणापि नानुभूतानीत्यत उक्तम् । निरन्तरेति । [३८।९] निरन्तरस्मृतिभिर्विषयीकृतानि तत

पदानां नियतपदार्थोपस्थापने सहकारि, न तु वाक्यार्थज्ञाने । आदिपदेन तत्रतत्र तात्पर्यग्राहकन्यायपरामर्षपरिग्रहः । यद्यपि संसर्गज्ञानप्रागभाव आकाङ्क्षा, अनन्वयनिश्चयविरहो योग्यता, अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिस्ताश्च स्वरूपसत्यो हेतवो, न तु ज्ञातास्तथापि निराकाङ्क्षादावाकाङ्क्षादिभ्रमेणान्वयबोधात्तासां ज्ञानं हेतुः । ज्ञायमानकरणे ज्ञानोपयोग्यप्रमाणव्यावृत्तवैलक्षण्यरूपत्वात् व्याप्तिवच्छब्दशक्तिवच्चेति भावः ।

अनुपपत्ताविति । विशेषप्रत्ययहेतुत्वं वाक्यलक्षणमन्त्यपदस्य विशेषाप्रतिपादकत्वात् स्वरूपासिद्धं स्यादित्यर्थः । नन्वेकस्मृत्या सहानेकस्मृतीनां विषयीकरणे समुच्चयो न युक्तः अनेकस्मृतीनामेककालासत्त्वादिति पूर्वोपपादकतया व्याख्यातुमाह । नन्विति । निरन्तरेति । यद्यपि पदानामेकैकशोऽप्यननुभवान्न स्मृतिः सम्भवति तथापि प्रत्येकवर्णानुभवजनितसंस्कारात् समूहालम्बना स्मृतिर्नानावर्णात्मकपदगोचरा ततो नानापदगोचरस्मृतिभिः संस्कारद्वारा तावत्पदगोचरा समूहालम्बना एका स्मृतिर्जन्यत इत्येकस्मृतिसमारूढानि पदानि वाक्यार्थधियं जन-

एकस्मृतिसङ्कलितानीत्यर्थः। नैरन्तर्यञ्च स्मृतीनां सन्नि-

यन्ति। अनन्यगतिकतया तथैव कल्पनादिति भावः। ननु स्मृतीनां न नैरन्तर्यं मध्यमस्मृतिभिर्व्यवधानादित्यत आह। नैरन्तर्य्यं चेति। सन्निकर्षो मनसा संयुक्तसमवायलक्षणः संस्कारो वेत्यर्थः।

ननु विशेषणपदसहकृतविशेष्यपदं न वाक्यलक्षणं पचतीत्यादौ कुलायमित्याद्यर्थाध्याहाराऽव्यापनात्। न च शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्य्यत इति न्यायात् तत्र शब्दाध्याहार एव अन्यथा प्रत्यक्षदृष्टे ऽपि कुलाये पचतीत्यन्वयबोधापत्तिः न चेष्टापत्तिः पचतीत्युक्ते तेमनमोदनं वेति संशयाभावप्रसङ्गादिति वाच्यम्। अन्योदीरितेन स्वयं वा स्मृतेन कुलायमिति पदेनान्वयबोधापत्तौ संशयाभावापत्तेस्तुल्यत्वात्। अथ तत्पदोपस्थितावपि तस्या ऽन्वयबोधपरत्वं न ज्ञातमिति नान्वयबोधः, तर्ह्याकाङ्क्षादिमदन्वयबोधपरपदार्थोपस्थितिरेव लाघवादन्वयबोधाङ्गमस्तु तस्माद्विशिष्टार्थानुभवजनकपदत्वमेव वाक्यत्वमिति केचित्। तन्न। ओदनं पचतीत्यत्रेवोदनः कर्मत्वं पाकः कृतिरित्यत्रान्वयबोधाभावात्। तत्राकाङ्क्षैव नास्तीति चेत्? तर्हि साकाङ्क्षत्वेन पदार्थानां पदविशेषोपस्थापितत्वं तत्त्वमित्यायातं पदस्यान्वयबोधकत्वमतः पदाध्याहार एव नार्थाध्याहारः, कथं वा द्वारमित्यत्र क्रियावाचकपदसमभिव्याहारं विना कर्मविभक्तिः साधुः। यदि च क्रियापदार्थ एव सा साधुः स्यात्तदा द्वारं पिधानं कुर्वित्यत्रापि द्वितीया स्यादित्यन्यत्र विस्तरः।

कर्षे बोद्धव्यम्। नन्वेतावताऽप्यसिद्धमेव लक्षणं, न ह्येवं भूतमप्यन्त्यपदं विशेषप्रतिपत्तिहेतुरित्याशयवानाह। स्यादेतदिति। [३८।११] ननु प्रत्येकं व्यभिचारे हि परस्परानुग्रहः स्यात्, न च पदकदम्बकप्रतिसन्धानवत्तदर्थस्मृतिरपि तथाविधां वाक्यार्थप्रत्ययोत्पत्तिं प्रति व्यभिचरतीत्यत आह। एतदुक्तं भवतीति [३८।१४] अयमाशयः—न तावत्पदार्था एव वाक्यार्थे प्रमाणं

ननु पदमाला चेत्यादिना लक्षणे काप्यनुपपत्तिर्न दर्शितेत्यत आह। नन्विति। अव्युत्पन्नानां पदज्ञाने ऽपि ततोऽन्वयबोधानुदयादित्यर्थः। ननु वाक्यलक्षणे पदार्थस्मृतीनामवान्तरव्यापारत्वकीर्त्तनमनुपयोगीत्यत आह। ननु प्रत्येकेति। अव्युत्पन्नानां यथा पदसमूहप्रतिसन्धाने ऽपि पदार्थोपस्थितेरभावात् पदसमूहज्ञानं न वाक्यार्थधियं जनयति तथा पदार्थोपस्थितौ सत्यां पदज्ञानाभावाद्वाक्यार्थबुद्धेर्नाभावः।

"पश्यतः श्वेतिमारूपं क्ष्वेषाशब्दं च शृण्वतः।
खुरनिक्षेपशब्दं च श्वेतो ऽश्वो धावतीति धीः(१)"

इत्यत्र कविकाव्यादौ वा चिन्तावशोपस्थितपदार्थेष्वन्वयबोधाच्च। तथा च पदार्थस्मृतिरेव वाक्यार्थबुद्धौ करणं पदानि तु तदुपस्थितावेवान्यथासिद्धानि न करणानीत्यर्थः। न तावदिति।

---

(१) श्लोकवार्त्तिके वाक्याधिकरणे ३५८ श्लोकः।

सर्वदा तत्प्रतीतिप्रसङ्गात्। नापि त एव स्मृताः प्रकारान्तरेणापि स्मृतानां तथाभावप्रसङ्गात्। नापि त एव पदैः स्मारिताः पदानां पदार्थस्मरण एवोपयोगे पूर्ववत्प्रतीतिप्रसङ्गात्। वाक्यार्थप्रतीत्युपयोगे तु तेषां कथं न तद्धेतुत्वम्। तथापि गुणप्रधानभावविनिगमनायां कोहेतुरिति चेत्। असाधारणकारणत्वं पदानां, तदर्थानां त्वतीतानागतादिरूपतया कारण-

---

पदं विनापि पदार्थसत्त्वादिति भावः। नापीति। ओदनः कर्मत्वं पाकः कृतिरित्यत्रापि पदार्थोपस्थितेरविशेषादन्वयबोधप्रसङ्गादिति भावः। पदैः स्मारित इत्यत्र पदानामुपलक्षणत्वं विशेषणत्वं वा। आद्यं निराकरोति। पदानामिति। पूर्ववदिति। प्रकारान्तरेणापि स्मृतात्पदार्थात् वाक्यार्थधीप्रसङ्गः पदानां पदार्थोपस्थित्यैवान्यथासिद्धत्वेनाकारणत्वादित्यर्थः। द्वितीयमाशङ्क्य निराकरोति। वाक्यार्थेति। पदजन्यपदार्थोपस्थितेः प्रयोजकत्वे पदकरणत्वस्यावश्यकत्वात् विशिष्टकारणताग्राहकमानेन विशेषणस्यापि विषयीकरणादित्यर्थः। तथापीति। पदानां प्रधानत्वं पदार्थानां गुणत्वमित्यत्र किं नियामकमित्यर्थः। असाधारणेति। ननु पदानामप्यतीतादिरूपतया कथं कारणत्वम्?, न च पदज्ञानकरणतावच्छेदकत्वेन कारणत्वं पदानामिति युक्तम्। पदार्थानामपि पदार्थज्ञानकरणतावच्छेदक-

त्वमेव नास्ति कुतोऽसाधारणत्वम्। अत एव न स्मृतिस्तेषां व्यापारः, किन्तु कारणीभूतानां पदानामेव। तथा च व्यापाराव्यभिचारमादाय निर्व्यापारा-

---

त्वेन करणत्वापत्तेः। मैवम्। असाधारणपदेनैवापास्तत्वात् पदार्थज्ञानस्य सकलप्रमाणसाधारण्येन संसर्गधीजनकत्वेनासाधारण्याभावात् अन्यप्रमाणजन्यसंसर्गज्ञाने पदानामकारणत्वेन वाक्यार्थबुद्धावसाधारण्यात् गौः कर्मानयनमित्यत्र गामानयेत्यतः पदार्थोपस्थितौ विशेषाभावे ऽप्यन्वयबुद्धेरभावेन पदविशेषजन्यपदार्थोपस्थितेस्तद्धेतुत्वे पदविशेषस्य विशेषकत्वात् प्रथमोपस्थितत्वाच्च प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यव्यापारदर्शनादन्वयज्ञाने पदानामेव प्राथमिकत्वात् व्यापाराभावादपि पदार्थानां न करणत्वमित्याह। अत एवेति। स्मृतेर्विषयाजन्यत्वेन स्वविषया स्मृतिर्न व्यापारो नापि व्यापारान्तरं सम्भवतीत्यर्थः।

अत एव पदार्थज्ञानानामपि करणत्वमपास्तम्। निर्व्यापारत्वात्। श्वेतोऽश्वो धावतीति धीश्च लिङ्गजा एकाश्रयत्वं च लाघवात्। अन्वयबोधे पदस्य हेतुत्वात्, काव्यस्थले च पदार्थज्ञानव्यापारकमुत्प्रेक्षादिसहकृतं मन एवान्वयानुभवे करणम्। उत्प्रेक्षादीनां च न प्रमाणान्तरत्वं निर्व्यापारत्वात्, लिङ्गादाविवानुगतानतिप्रसक्तप्रमाकरणतावच्छेदकरूपाभावाच्चेति भावः। किन्त्विति। पदार्थस्मृत्यैव व्यापारेण तेषां कारणत्वादित्यर्थः। पूर्वोक्तं पदानां व्यभिचारं निराकरोति। तथा चेति। पदार्थस्मृतिरूपव्यापारवतां

वस्थायां व्यभिचारवतामकारणत्वाभ्युपगमो बहु व्याकुलयतीति ।

प्रतिसन्धीयमान इति वार्त्तिकनिराकरणीयमतिव्यापकत्वं दर्शयति । यदीति [३८।१७] निष्पत्तेर्भेदं दर्शयितुं सिद्धिव्याख्यानमनुवदति । वास्तव इति । [३८।२६] न हि प्रतिज्ञावचनं निश्चायकं-विशिष्टस्येति शेषः । हेतुवचनादिवैयर्थ्यात्-वैयर्थ्यप्रसङ्गात् । साधनस्य न्यायः प्रवृत्तिप्रकारः । स च "नानुपलब्ध" इत्यादिभाष्येण दर्शितः । तस्यातिपातोऽभाव एव । तमेव व्युत्पादयेत्-प्रधानतयेति शेषः । तस्य च न्यायविशेषस्याऽऽत्मादिविषयस्येत्यर्थः ।

पदानां तद्विरहादन्वयबुद्धाजननमिन्द्रियादीनामपि सन्निकर्षाद्यभावे कार्याभाववतां कारणत्वं प्रत्यादिशतीत्यर्थः ॥

ननु हन्त दशदाड़िमेत्यादिना लक्षणे किञ्चिद्दूषणमुक्तमित्यत आह । प्रतिसन्धीयमान इति । प्रतिज्ञायाः स्वार्थनिश्चायकत्वादध्याहरति । विशिष्टस्येतीति । अनाप्तोक्तत्वेन पक्षनिष्ठसाध्यस्येत्यर्थः । हेत्वादिवैयर्थ्यमिदं न हेतुरिति प्रसङ्गपरतया व्याचष्टे । वैयर्थ्येति । नन्वात्मादिविषयकन्यायतुल्यतया ऽन्योऽपि न्यायो व्युत्पाद्यः शास्त्रस्यास्त्येवेत्यत आह । प्रधानतयेतीति ।

अलौकिकोपचारत्वात्प्रयोजनमाह । आगमोपचारस्येति [३९।८] अर्थसंवादेनेति करणे तृतीया । आगमविरोधशङ्कानिवृत्तिरनुग्रहः दृढभूमिश्च संस्कारः आगमैकविषयत्वात् । सप्रयोजनश्च भवति-निःश्रेयसेन प्रयोजनेन प्रयोजनवांश्च ज्ञातो भवतीत्यर्थः । कुतः । आगमार्थेति । [३९।१०] निरूढत्वात्-प्रसिद्धत्वादित्यर्थः ।

ननु न सर्वत्रोपचारे प्रयोजनमित्यत आह । अलौकिकेति । अनादावुपचारे तदभावे ऽपि स्वयं कृते तदस्त्येवेत्यर्थः । कर्तृभ्रमं निवारयति । करण इति । आगमविरोधेति । ननु प्रसिद्धानुमानादपि तच्छङ्कया कुतोऽनुमितिः । न च बाधकेन तद्ग्रहादामः । तद्धि न तावत्प्रत्यक्षम्, आगमानामनन्तत्वात् । नाप्यनुमानं, तत्राप्यागमाविरोधावधारणार्थं बाधकानुमानानुसरणे ऽनवस्थापत्तेः । नैवम् । परोपदेशादुत्थितशङ्कानिवृत्तिदर्शनात् । अनिवृत्तौ चानुमितिनिवृत्तेरिष्टत्वात् । अन्यथा विरोध्यागमसन्देहात्समस्तवेदार्थानध्यवसाये वेदात्प्रवृत्त्यभावापत्तेः । दृढभूमिश्च संस्कार इत्यत्रार्थग्रह इत्यनुषञ्जनीयम् । ननु न्यायस्य सप्रयोजनत्वं न न्यायेन जन्यते किन्तु तज्ज्ञानेनेत्यत आह । निःश्रेयसेनेति । इत्वाकाङ्क्षामुत्थापयति । कुत इति । ननु तत् खल्वित्यनेन परामृश्यमाणलिङ्गस्य हेतुत्वमुक्त्वा न चेत्यादिना तन्निषेधः परस्परविरुद्ध इति तर्क-

तत् खलु हेतुवचनमनुमानप्रतिपादकं-परामृश्यमाणलिङ्गप्रतिपादकं यदि स्यात् तदा विषयतयानुमानेन परामृश्यमानेन लिङ्गेनानुग्रहीतव्यं न च तस्य परामृश्यमानं लिङ्गं विषय इति भावः ।

ननु यदेव दृश्यमानं लिङ्गं हेतुवचनस्य विषयः तदेवानुमितिभावकमित्यत आह । न च लिङ्गदर्शनमात्रमिति । [३९।१६] दृश्यमानलिङ्गमात्रम् । अपि तु सम्बन्धस्मृतिसहकारीति-परामृश्यमानं लिङ्गमित्यर्थः ।

परतया योजयति । यदि स्यादिति । न चेति । हेतुवचनेन व्याप्तिरहितं लिङ्गमात्रं प्रतिपाद्यते न तु व्याप्तिविशिष्टमित्यर्थः । अप्रसक्तप्रतिषेधमाशङ्क्याह । नन्विति ।

ननु लिङ्गदर्शनं न हेतुवचनस्य विषय इत्यत आह । दृश्यमानेति । दृश्यमानं-पक्षे धूमादिस्वरूपम् ।

ननु व्याप्तिस्मृतिसहकृतमपि द्वितीयं लिङ्गदर्शनं नानुमानं किन्तु तृतीयमित्यत आह । परामृश्यमाणमिति । द्वितीयलिङ्गदर्शनस्य विषयो व्याप्तिस्मृतिरहितं लिङ्गं तत्प्रतिपादकत्वाद्धेतुवचनं न तृतीयलिङ्गपरामर्शविषयलिङ्गस्यानुमानप्रतिपादकमिति कुतस्तत्रानुमानत्वोपचार इत्यर्थः । शुद्धमप्यापातत इति टीकायां प्रथमं व्याप्तिस्मृतिरहितमपीत्यर्थः ॥

तदिदमुक्तम् । तस्मान्न लिङ्गवचनमनुमानप्रतिपादकमिति । [१९।१७] द्वितीयदर्शनविषयलिङ्गप्रतिपादकं न परामृश्यमाणलिङ्गप्रतिपादकमित्यर्थः । व्याख्यानं ग्रन्थानुरोधादस्फुटमित्याशयवानाह । एतदुक्तं भवतीति । [१९।२५] एवञ्च तत्प्रतिपादकस्य-विषयप्रतिपादकस्येत्यर्थः । लिङ्गपरामर्शस्तावदनुमानं तस्य च व्याप्तिस्मृतिसहकारिताऽनुमितौ, द्वितीयलिङ्गदर्शनस्यापि व्याप्तिस्मृतिसहकारिता परामर्शज्ञानजनन एवेत्युभयोरपि सम्बन्धस्मृतिसहकारितासाम्यादनुमानत्वं ततस्तद्विषयलिङ्गस्यापि ततस्तदनुगृहीतस्य वचनस्यापीत्यर्थः ।

ननु हेतुवचनं न द्वितीयलिङ्गदर्शनप्रतिपादकमित्यत आह । तद्विषयेति । तत्र सम्बन्धस्मृतिसहकारित्वं द्वितीयलिङ्गदर्शनस्य यत्र विषये तद्दर्शयति । लिङ्गपरामर्श इति । अनुमितौ तृतीयलिङ्गपरामर्शो व्याप्तिस्मरणस्य कारणस्यावान्तरव्यापारतया हेतुरिति भवति व्यापारव्यापारिणोः सहकारित्वं लिङ्गपरामर्षे अनुमितिजनकस्योत्पत्त्यर्थमेव व्याप्तिस्मरणापेक्षा व्याप्तिरूपविशेषणज्ञानं विना तद्विशिष्टज्ञानात्मकस्य तृतीयलिङ्गपरामर्शस्यानुत्पादादिति । न च लिङ्गमेवानुमितौ करणं तच्च हेतुपदवाच्यं

किमस्योपचारस्य फलमित्यत आह। एव-ञ्चेति। [३९।२८]

ननु प्रत्यक्षविषयस्य स्मृतिः ततः पुनरुपदर्शनादिति वक्तव्ये कुतो विपरीतमित्यत आह। यत्रेति। [४०।३] यद्यपि पूर्वप्रत्यक्षविषयो दृष्टान्तस्तथाप्युदाहरणकाले तथा स्मृत्यारूढ एव व्याप्रियते इत्येतावता तथैवोक्त-मित्यर्थः। न केवलं प्रत्यक्षेण सहैकविषयत्वमुपचारे बीजमपि तु समानव्यापारत्वमपीत्याह। पुनरुपदर्श-नात्-पुनः स्मरणात्। प्रत्यक्षमपि हि विप्रतिपत्तिं परिभूय व्याप्तिविषयतया दृष्टान्तं स्मारयति। तद्वचन-मपीति। अपरमपि बीजमाह। मूलभूतेति। [४०।५]

भवत्येवेति क्व लक्षणेति वाच्यम्। लिङ्गस्यातीतानागतसाधा-रण्येनाजनकतया तत्परामर्शस्यानुमितिजनकत्वादिति वक्ष्य-माणत्वात्। परामृश्यमाणलिङ्गकारणतावादिमते तादृशस्य लिङ्गस्य हेतुवचनाप्रतिपाद्यत्वात् केवललिङ्गस्यैव तत्प्रतिपाद्यत्वात् विशिष्टाच्च विशेष्यस्यान्यत्वादिति भावः।

उत्तरग्रन्थोपयोगार्थमाह। किमस्येति। स्वायत्ते शब्दप्रयोगे प्रयोजनं विनोपचारस्यान्याय्यत्वादित्यर्थः।

यत्र प्रत्यक्षे विषय इत्यादिव्याख्याननिरस्यां शङ्कामाह। नन्विति। उदाहरणस्य यथाशब्दार्थापेक्षाया हेतुमाह। ननु

ननु यथाशब्दतदर्थयोरुपनये वार्त्तापि नास्ति तत्कथमाह यथा तथेत्यत आह । उपनयो हीति ।[४०।८] यद्यपि निगमने ऽपि प्रमाणविशेषसमावेशोऽस्त्येव तथापि जात्यभिप्रायेणायं विवक्षितो न च तत्र चतुष्टयविजातीयं प्रमाणमस्तीत्यतस्तद्व्याख्यानात्पूर्वमेव परमत्वोपपादनाय समस्तप्रमाणविनिवेशनमाह । सोऽयमिति । [४०।१६]

मूलसमवायादौपचारिकः समवायो भविष्यती-

यथेति । ननु निगमनव्याख्यानात् पूर्वमेव प्रमाणविनिवेशनस्योक्तत्वादवयवचतुष्टयस्यैव प्रमाणमूलकत्वमतो न निगमनस्य तथात्वमित्यत आह । यद्यपीति ।

जात्यभिप्रायेणेति । अवयवानां प्रमाणसन्निवेशोऽवयवजातीयमात्राभिप्रायेण न त्ववयवचतुष्टयमात्रनैयत्येन विवक्षित इत्यर्थः । निगमनव्याख्यानात् प्रागेवावयवानां प्रमाणविनिवेशेऽभिप्रायान्तरमाह । न चेति । प्रत्यक्षादिचतुष्टयमेव प्रमाणं तस्य प्रतिज्ञादिचतुष्टये ऽभिहितत्वान्निगमने ऽपि तद्बोद्धव्यमित्यर्थः । नन्ववयवानां वाक्यसमवायनिराकरणावसरे प्रमाणानां तन्निराकरणमर्थान्तरमित्यत आह । मूलेति । अवयवानां वाक्यासमवाये ऽपि तन्मूलप्रमाणानां तत्र समवाय इति मूलिनामवयवानां तत्र समवाय औपचारिकः स्यादिति शङ्कानिरा-

त्यत उक्तम्। प्रमाणानां वेति। [४०।१७] अध्यारोपो विनिवेशनं भ्रान्तिर्वा न सम्भवतीत्यत आह। अध्यारोप इति। [४०।१८] सामर्थ्ये सति सहकारितयाऽन्यदपेक्षते न त्वपेक्षैव सामर्थ्यमित्यभिप्रायवानाह। सामर्थ्यं हीति। [४०।१९]

धर्मः-कारणत्वलक्षणः। तदनेन "किं पुनः सामर्थ्य"-मिति पृच्छतोऽभिसन्धिर्दर्शितः। उत्तराभिसन्धिमाह। इह त्विति। [४०।१९] सामर्थ्याकाङ्क्षयोः परस्परव्याप्तेराकाङ्क्षैव सामर्थ्यशब्देन विवक्षितेत्यर्थः।

तदेवंरूपयोः समवायसामर्थ्ययोः प्रदर्शने फलं दर्शयति। तदत्रेति। [४०।२०] प्रयोजनाभेदेऽप्याकाङ्क्षाविरहितत्वात् वाक्यैकवाक्यत्वं न भवति। यथा—

करणायेदमुक्तमित्यर्थः। सामान्यशब्दस्य विशेषपरत्वे हेतुमाह। अध्यारोप इति। ननु सामर्थ्यं कारणत्वं न तु साकाङ्क्षत्वमतः साकाङ्क्षत्वमेव तदित्ययुक्तम्। न चापृच्छतो विप्रतिपत्तिबीजमुक्तमित्यभिप्रेत्य सामर्थ्यं हीत्याद्याक्षेपपरतया व्याचष्टे। सामर्थ्यं सतीति॥

ननु साकाङ्क्षत्वमपि धर्मः सामर्थ्यं स्यादित्यत आह। धर्म इति। विरोधं निरस्यति। सामर्थ्येति।

"भगो वां विभजतु पूषा वां विभजतु अर्यमा वां विभज"त्वित्यादि, अत उक्तं विभज्यमानेति ।[४०।२२] आकाङ्क्षायामपि प्रयोजनानेकत्वे वाक्यैकवाक्यत्वं न भवति यथा—

"स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि" ।

इत्यत उक्तं प्रयोजनमिति । तदेतेन—

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" । इति जैमिनीयं (१) वाक्यैकवाक्यतालक्षणमभिहितम् ।

यथेति । विभागात्मकस्यार्थस्यैक्ये ऽपि परस्परनिराकाङ्क्षत्वा- "भगो वां विभजतु पूषा वां विभज"त्वित्यनयोर्नैकवाक्यतेत्यर्थः ।

यथा स्योनं ते इति । स्योनं ते इत्यादि कल्पयामीत्यन्तं सदनप्रकाशकं, "तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेधे"ति सादनप्रकाशकम् । तदस्य सदनसादनरूपप्रकाश्यार्थभेदात् साकाङ्क्षत्वे ऽपि नैकवाक्यत्वमित्यर्थः । वाक्यैकवाक्यता चैवं न पदैकवाक्यता अपरिपूर्णे पूर्ववाक्यार्थे, तस्मादिति निगमनवर्त्तिसर्वनाम्ना परामर्शाभावप्रसङ्गादिति सम्प्रदायविदः । यद्यपीत्यादिना प्रकृते यद्दूषण-

---

(१) जैमिनि सू० ४६। अ० २ पा० १।।

ननु विप्रतिपन्नो यदि ? वाक्येनैव प्रतिबोधयितुं शक्यते, अथ वाक्ये तदर्थे वा विप्रतिपद्यमानः ? केनोपायेन बोधनीयः, वाक्यान्तरेण चेदनवस्थेत्यत आह। यद्यपीति। [४०।२८] अनन्यथासिद्धप्रत्यक्षागमागोचराभिप्रायमेतदित्यर्थः। विकल्पो—ऽनुवादविशेषः। तस्य प्रयोजनं-विधिः प्रतिषेधो वा। अत्र चाक्षेपावसरे प्रतिषेध एव विशेषप्रतिपादकत्वमिति वदता तत्त्वव्यवस्थाश्रयत्वं विवृतम्। तत्र तत्त्वं विशेषः, तस्य प्रतिपत्तिर्व्यवस्था तद्धेतुत्वमाश्रयत्वम्। तत्र विशेषः क

मुक्तं तदाह। नन्विति। तथा च प्रत्यक्षाद्यन्यतमस्यापि विप्रतिपन्नपुरुषप्रतिपादकत्वमिति न तदेव पञ्चावयववाक्यस्य परमत्वमिति भावः। प्रत्यक्षाद्यविषयवेदप्रामाण्यादिबोधनस्य पञ्चावयववाक्यैकसाध्यत्वमाह। अनन्यथासिद्धेति। विषयान्तरेऽपि प्रमाणान्तराणां कथायामनुमानच्छाययैवोपयोगात् पञ्चावयवस्यैवोपयोग इत्यपि द्रष्टव्यम्। ननु यदि विकल्पप्रयोजनप्रश्नोऽयं तदा "यदि प्रमाणान्तर"मित्यादिना प्रत्येकमनूद्य दूषणमयुक्तमित्यत आह। विकल्प इति। "यदि प्रमाणान्तरम्" "अथ तेष्वन्तर्भवतीति" विकल्पोपस्थितैकैकानुवादरूप इत्यर्थः स चैकैकप्रतिषेधार्थ इति भावः। ननु वार्त्तिककृता विशेषप्रतिपादकत्वमाश्रयपदार्थ उक्तः तत्कथं तस्यार्थः तत्त्वव्यवस्थाश्रयत्वमुच्यत इत्यत आह। विशेषेति। यद्या-

इत्यत उक्तम्। धर्मविशिष्टो धर्मीति। [४१।९] वाक्याद्धि साधनधर्मविशिष्टो धर्मी साक्षात्प्रतीयते, साध्यरूपधर्मविशिष्टस्तु तद्द्वारेत्युभयमपि विवक्षित्वा सम्मुग्धमुक्तमिति॥

(इति अवयवनिरूपणम्।)

ननु प्रमाणान्तरत्वेऽपि तर्कस्य प्रमाणपदेन सङ्ग्रह एव, सामान्येन विशेषस्य सङ्कलनात् तत्किमित्याह "न प्रमाणान्तर"मत आह। प्रमाणपदेन हीति। [४१।१२]

दृष्टं(१) हि सामान्यशब्देनापि कस्य चिदसङ्ग्रहः

अयशब्दस्यैव विशेषप्रतिपादकत्वमर्थः स्यात् तदा तत्त्वव्यवस्थापदार्थो नातिरिक्तः स्यादिति वार्त्तिककृता तत्त्वव्यवस्थामादायैवाऽऽश्रयार्थ उक्त इति टीकाकृताऽभिमन्धिरित्यर्थः। तथापि मिषाधयिषितधर्मविशिष्टधर्मिप्रतीतिर्न पञ्चावयवसाध्या, किन्त्वनुमितिसामग्रीसाध्येति धर्मशब्दस्य साधनसाध्यपरत्वमाह। वाक्याद्धीति॥

(इति अवयवनिरूपणम्।)

ननु प्रमाणपदं तत्सामान्यवाचि तत्विशेषपरतया कुतो व्याख्यातमित्यत आह। नन्विति। सामान्येनेति। सामान्यस्य यावद्विशेषव्यापकत्वादित्यर्थः।

---

(१) दृष्टो हि इति २ पु० पा०।

कुतश्चित्कारणादित्यभिसन्धिः। अत एव प्रमाणान्तरत्व-शङ्कायां सङ्गृहीतेभ्यो विशेषेभ्योऽन्यत्वमुक्त्वा प्रमेयं दृष्टान्तत्वेनोपात्तम्। अनिश्चायकत्वात्—स्वातन्त्र्येणेति शेषः। किन्तु प्रमाणविषयविभागहेतुतयेति। ४१।२०] तस्य (१) प्रमाणस्येयमितिकर्तव्यता तदीयविषये तद-पेक्षत्वादित्यर्थः।

दृष्टं हीति। सामान्यशब्दस्यापि विशेषपदसमभिव्याहाराद्वि-शेषपरत्वं दृष्टं तद्वदिहापि प्रमाणान्तरसमभिव्याहृतं प्रमाणपदं चत्वार्येव प्रमाणानि ब्रूत इति तथैव व्याख्यातमित्यर्थः। अत एवेति। यथा प्रमाविषयत्वमात्रेणान्येषामपि सङ्ग्रहसम्भवे प्रमेय-विशेषस्यैवात्मादेः प्रमेयपदेन सङ्ग्रहः कृतस्तथा प्रमाणपदेनापि विशेषस्यैव सङ्ग्रहे तर्कस्य प्रमाणान्तरत्वशङ्का स्यादित्यर्थः। संशया-दय इत्यत्र टीकायामतद्गुणसंविज्ञानो बहुव्रीहिः संशयस्य बुद्धि-त्वेन सङ्ग्रहात्। ननु तर्कः प्रमाणव्यापारत्वात् निश्चायक एवेत्यत आह। स्वातन्त्र्येणेति। यत्प्रमाणविषये तर्कः प्रवर्त्तते तत्सापेक्ष-तया तदनपेक्ष्यानिश्चायकत्वादित्यर्थः। गुणत्वेनेति टीका। गुणत्व-मात्रस्याऽऽत्मन्यलिङ्गत्वेऽपि प्रसिद्धवाचकसङ्गतस्य तथात्वमिति भावः। ननु प्रमाणविषयविभागहेतुतयाऽपि तर्कस्य निश्चायकत्वमेव स्यादित्यत आह। तस्येति। साध्यतदभावकोटिकसंशये तत्कोटि-कतज्जन्यनिश्चयजिज्ञासायां सत्यां विरोधिरूपोपस्थितौ सतोऽपि

---

(१) यस्य इति २ पु० पा०।

एतदुक्तं भवति-तर्को हि प्रमारूपं प्रमाणं स्यात् लिङ्गदर्शनवत्, अप्रमारूपं वा इन्द्रियादिवत्, न तावदाद्यः तस्याहार्यारोपरूपत्वात्, अत एव न तत्करण-

---

लिङ्गपरामर्शस्यानुमित्यजनकत्वादन्यथा सत्प्रतिपक्षदोषाभावापातादित्यनभिमतकोटावनिष्टप्रसङ्गेनानियतकोटिसंशयादिनिवृत्ति-रूपोऽनुमितिविषयविभागस्तर्केण क्रियते। यद्यपि विरोधिशङ्काया असार्वत्रिकत्वात् व्यभिचारेणायं तर्कव्यापारस्तथापि यत्र शङ्का तत्र मा निवर्त्यत इत्येव व्यापारार्थः। अयं च व्यापारो न सार्वत्रिकः किन्तु यत्र पुरुषप्रयत्नसाध्यानुमानप्रवृत्तिस्तत्रैव द्रष्टव्यः। न च तर्कस्य साधकबाधकप्रमाणान्तरत्वेन कथमत्र शङ्कानिवर्त्तकत्वमिति वाच्यम्। तर्कस्यापि सिद्धिप्रयोजकत्वेन साधकत्वात्। प्रमाणस्यापि साधकादित्वे शङ्कानिवृत्तौ वैषयिकविरोधस्य तन्त्रत्वात्। तस्य च तर्कसाधारणत्वात्। न च विरोधिविषयनिश्चयस्यैव प्रतिबन्धकत्वान्न शङ्कायास्तज्जन्यनियत-जिज्ञासायाश्च प्रतिबन्धकत्वमिति किं तदसाधारणेनेति वाच्यम्। विरोधिविषयत्वस्यैव प्रयोजकत्वे निश्चयत्वस्य व्यर्थत्वाद्विरोधि-निवृत्तिरूपसहकारिसम्पादकत्वमेवास्येतिकर्त्तव्यतार्थमित्यर्थः।

नन्वत्र ग्राह्यप्रमाणनिरपेक्ष एव तर्कः किं निश्चायकः स्यादित्यत आह। एतदुक्तमिति। तस्याऽऽहार्य्येति। आपाद्यापादकांशयोराहार्यरूपत्वादित्यर्थः।

ननु नायमारोपः आपाद्यापादकस्वरूपे तस्य तात्त्विकत्वात्,

स्यापि प्रामाण्यमप्रमाफलत्वात्। नापि द्वितीयः स्वि-

नापि तयोः संसर्गे, तस्याप्यबाधनात्. न हि यदि निर्वह्निरयं तदा निर्धूम इति बुद्धिः कदापि वाच्या तथात्वे तर्काभासादविशेषप्रसङ्गः। विलक्षणगृहे यद्यतिथिरागतः स्याद्भोजितः स्यादित्यत्रातिथिरायाति भोज्यते, तत्र न तर्कस्याहार्यारोपरूपत्वम्। मैवम्। तर्को हि निर्वह्निरयं निर्धूम इति निर्वह्नित्वादिना सहेदंत्वस्य सामानाधिकरण्यमुल्लिखति। एतन्मूलकमभिधानमपि तत्सामानाधिकरण्यविषयं न च तदस्ति वास्तवम्। अथ निर्वह्निरयं निर्धूम इत्यतो विलक्षणविषयकस्तर्कोऽनुभूयते यद्य(प्य)र्थस्यादर्थयोरत्र विषयत्वादिति मतम्। तन्न। तथापि तर्कस्यारोपिताव्यवस्थितसत्त्वोपाधिकसत्त्वविषयत्वेनानिश्चायकतया प्रमारूपत्वाऽभावात्। तथा च संशयात्प्रच्युतो निर्णयं चाप्राप्तः तर्क इत्याहुः अन्यत्राचार्याः। संशयो हि दोलायितानेककोटिकः। तर्कस्तु नियतां कोटिमालम्बते। तर्के समीचीनज्ञानं व्यवहारस्तु तर्कप्रवृत्तिहेतुव्याप्त्यादिज्ञानसम्यक्ज्ञानवत्त्वात्। अत एव तर्काभासादविशेषः। सम्भावनात्मा च प्रसङ्गो न तर्कस्तस्यानिष्टप्रसञ्जनात्मकत्वादिति भावः।

तत्करणस्यापि-तर्ककरणस्यापीत्यर्थः। तर्को हीन्द्रियाद्यजन्यां प्रमां जनयेत्तज्जन्यां वा। नाद्यः तस्यासिद्धेः। नान्त्य इन्द्रियादिनिरपेक्षं हि तज्जनकं तत्सापेक्षं वा, नाद्यो व्याघातात्। नान्त्योऽपेक्षणीयप्रमाणान्तरसहायत्वे तस्यैव प्रमाणतया तस्येतिकर्त्तव्यतामात्रत्वे पर्य्यवसानादिति दूषणे सत्येव दूषणान्तरमाह।

षयव्याप्यविपर्यये ह्यस्य प्रामाण्यमाशङ्कितं, तेन च नास्य नियामकः सम्बन्धः, असम्बद्धस्य गमकत्वे ऽतिप्रसङ्गः, तद्विषयविपर्ययस्य तु तेन सह स्वाभाविकः सम्बन्धोऽस्ति, तेन तत्संवलितस्य प्रवृत्तेस्तदितिकर्त्तव्यतात्वमेव, नहि विपर्ययाऽपर्यवसितं क्वचिदपि कृतार्थं

स्वविषयेति । यदि निर्वह्निः स्यात् निर्धूमः स्यादिति तर्कविषयो निर्धूमत्वं तस्य व्याप्यं निर्वह्नित्वं तद्विपर्ययो वह्निमत्त्वं तत्रेत्यर्थः । तेन चेति । तेन वह्निमत्त्वेन निर्धूमः स्यादिति तर्कस्य सम्बन्धो नियामको नास्ति । अन्यस्यान्यत्र गमकत्वमित्यतिप्रसङ्गे सम्बन्धस्यैव नियामकत्वादित्यर्थः । तद्विषयेति । तर्कविषयनिर्धूमत्वाभावस्य धूमस्याग्निना व्याप्तिरेव सम्बन्धो ऽस्तीति नातिप्रसङ्ग इत्यर्थः । ननु तर्कानुग्राह्यत्वाभिमतप्रमाणविषयो वह्निमत्त्वादिस्तदभावव्यापकीभूतधूमाद्यभावविषयकत्वमेव नियामकः सम्बन्धो भविष्यति परम्परासम्बन्धस्यापि नियामकत्वादित्यत आह । तेनेति ।

तथात्वे ह्यापाद्यविपर्ययपर्यवसानं विनापि तर्कः साधकः स्यात् । तदपि सहकारीति चेत् ? एवं तर्हि विपर्ययानुमानादेव साध्यानुमित्युपपत्तौ तर्कस्य प्रमाणत्वे मानाभावात्तदितिकर्तव्यतैव तर्कः । न च तर्कः प्रमाणं लिङ्गपरामर्शस्तु तदितिकर्तव्यतेति वैपरीत्यमस्त्विति वाच्यम् । तर्कः प्रमाणसहायो न प्रमाणमिति प्रत्यक्षसिद्धत्वात् । न हि तर्कस्तत्र प्रमाणं तं विनापि प्रत्यक्ष-

प्रसङ्गमीक्षामहे। नन्वेवं तर्हि प्रमाणस्यापि केवलस्य न क्वचिदपि कृतार्थत्वं तथा सति प्रसङ्गतद्विपर्यय-पिण्ड एव प्रामाण्यं पर्यवस्येत्।

एवमेतत्-सेतिकर्त्तव्यताकस्यैव सर्वत्र करणत्वात्, इतिकर्तव्यतातद्भावकल्पनायां त्वयं विभागः, तदिदं वक्ष्यति, तस्य प्रसङ्गरूपतया पारतन्त्र्येण स्वयमसाधन-त्वात्। प्रसञ्जनीयस्य प्रमाणविरुद्धत्वेनाऽनिष्टत्वमयुक्तत्वं

प्रवृत्तेः। न चैवं सहायोऽपि न स्यादिति वाच्यम्। विरोधिश-ङ्कायां सत्यां तस्यापेक्षणीयत्वादित्युक्तत्वात्। तथापि शङ्कानिवृत्तौ परं स हेतुः स्यात् न तु फले ऽपि व्यभिचारादिति चेत्। न। तर्कप्रवृत्तौ सत्यां फले ऽपि वैलक्षण्यात्। केवलात्प्रत्यक्षादितो हीद-मित्थमिति प्रतीतिस्तर्कसहकारिणस्तु इदमित्थमेवेति। अत्रापि न तर्कः कारणं तं विनापि शब्दात्तादृशप्रत्ययादिति चेत्। न। एवं सतीन्द्रियादेरप्यकारणतापत्तेः। जातिभेदे तदपेक्षानियम इति चेत्। तर्हि यत्प्रमाणं यमर्थं बोधयति तत्तर्कसहकृतं तमर्थमित्थमेवेत्यव-धारयतीति भावः। नन्वेवमिति। तर्कावताराद्विपक्षाकवलितत्वेन तर्कानुमानयोर्मिलितयोरेव प्रमाकरणत्वं स्यादित्यर्थः।

तद्भावेति। इतिकर्त्तव्यतावत्त्वं प्रसञ्जनीयस्यापाद्यस्य निर्धूम-त्वस्य प्रमाणविरुद्धत्वेनेति पक्षे धूमवत्त्वस्य प्रमितत्वादित्यर्थः। भव-तीत्यस्य सम्भवतीत्यर्थव्याख्याननिराकार्यां शङ्कामाह। नन्विति।

साधनीयस्य प्रमाणाविरुद्धत्वेनेष्टत्वं युक्तत्वम्। तेनायमर्थो वार्त्तिकस्य यद्येवं नाभविष्यत् तदैवं युक्तत्वमहास्यत् इद-ञ्चायुक्तत्वमुपादास्यतेत्यत आह। इति कारणेति।[४१।२२]

ततः प्रसङ्गरूपव्युत्पादनस्य वार्त्तिकेनाऽविरोधः। भाष्यन्तु प्रसङ्गे स्फुटमेव। ननु भवतीति प्रमाण-व्यापारात्प्रागेव यदि निश्चितं तदा तर्कः प्रमाणमेव स्यादत आह। सम्भवतीति। [४१।२४] सम्भावना चेहा-ऽविरोधमात्रं, न तु संशयः अयुक्तांशस्यापि संशयास्पद-त्वात्, अनुज्ञा चेयमेव यत्प्रवर्त्तमानप्रमाणानुकूलत्वे-नावस्थानं, तदाह। एतदुक्तं भवतीति। [४१।२५]

अनुजानन्--विरुद्धधर्मव्युदासरूपेणाविरोधयन्नि-त्यर्थः। अनुगृह्णाति-सव्यापारीकरोतीत्यर्थः। तद्विषय-

---

ननु सम्भावना संशयः तदर्थस्य युक्तायुक्तात्मकत्वेनायुक्तांशस्या-प्यनुज्ञापत्तिरित्यत आह। सम्भावना चेति। अविरोधमात्रम्—अनुमेयकोटावित्यर्थः। नन्वनुज्ञाने च तद्धर्मः कथं तर्कधर्म इत्यत आह। अनुज्ञा चेति। अनुमेयविरोधिकोटिशङ्कानिवर्तनद्वारा सहकारित्वेनेत्यर्थः। सतोऽपि लिङ्गपरामर्शस्य विरोध्युपस्थिति-प्रतिबन्धेनाजनकत्वात्तर्केण तु साध्याभावकोटावनिष्टप्रसङ्गात्मना तन्निवर्त्तनादिति भावः।

एतदेव टीकामुखेन स्फुटयति। तदाहेति।

प्रामाण्यानुकूल्येन तर्कस्यापि तद्विषयत्वमिति भ्रान्तिमाशङ्क्य निराकरोति। न चेति। [४१।२८] पारतन्त्र्येण-विपर्ययपरतन्त्रतयेत्यर्थः।

आरोपरूपतामुपदर्शयन्नेव स्वविषयद्वाराऽप्यस्य प्रामाण्यं निराचष्टे। अस्ति हीति। [४२।२] न प्रसङ्गो हेतुर्न प्रसज्यमानो हेतुर्लिङ्गमसिद्धत्वादित्यर्थः। ननु न हि यदेव विद्यते तदेव दृश्यत इत्यस्ति नियम इत्यत आह। तेन सहेति। [४२।४]

"तस्मान्नास्तीति" फलद्वारेण तर्कस्यानुग्राह्यं प्रमाणं दर्शितम्। तेनानुज्ञायमानं प्रवर्त्तते-फलं साधयति। फलमाह। केवलमेवेदमिति। [४२।६]

विपर्ययेति। विपर्ययानुमानमूलभूतव्याप्तिनिश्चयोपजीवनेनेत्यर्थः।

ननु तर्कस्यामाधनत्वं साधितमेवेति किं तत्र युक्त्यन्तरेणेत्यत आह। आरोपरूपतामिति। विषयो-निर्धूमत्वम्। कर्मधारयसमासमाश्रित्य व्याचष्टे। न प्रसङ्गेति। प्रसज्यत इति प्रसङ्गः प्रसङ्गविषयो निर्धूमत्वं स न हेतुर्लिङ्गम्। अत्र हेतुमाह। असिद्धत्वादिति। पक्षे धूमस्यैव प्रामाणिकत्वादित्यर्थः। तेन सहेत्यस्योपयोगार्थमाह। नन्विति।

ननु तस्मान्नास्तीति न तर्कशरीरं, नापि फलं, तस्याग्रे

कैवल्यस्वरूपविप्रतिपत्तेस्तद्विवृणोति । नहेति ।[४२।६]

तदेवमभावविषये प्रत्यक्षे ऽपि तर्कं दर्शयता अनुपलब्धिलिङ्गकानुमानसाध्योऽभाव इति सौगतमतमपास्तम् । अनुपलब्धेरपि निषेधरूपतया ऽनुमानान्तरसाध्यतायामनवस्थानात्, असिद्धायाश्चाऽगमकत्वात्, प्रत्यक्षतस्तत्सिद्धौ त्वनुमानानवकाशात्, व्यवहारस्यापि विकल्पानुगतव्यापारात्प्रत्यक्षत एव सिद्धत्वात् । अन्यथा विधिव्यवहारार्थमप्युपलब्धिलिङ्गकानुमानमास्थेयम् । एवं च पुनरप्यनवस्थैव, न हि लिङ्ग-

---

कैवलमेवेत्यनेन दर्शितत्वादित्यत आह । तस्मादिति । प्रवृत्तिः प्रयत्नो न प्रामाण्यस्य सम्भवतीति व्याचष्टे । फलमिति ।

ननु कैवल्यमभाव एवेति नहेति पुनरुक्तमित्यत आह । कैवल्येति । कैवल्यमधिकरणस्वरूपविशेष इति मतनिराकरणार्थमित्यर्थः ।

प्रसङ्गादाह । तदेवमिति । अलिङ्गत्वे हेतुमाह । अनुपलब्धेरपीति । लिङ्गस्य ज्ञायमानस्यैवानुमापकत्वादिति भावः । तर्ह्यभावव्यवहारो ऽनुपलब्धिलिङ्गकानुमानजन्योऽस्त्वित्यत आह । व्यवहारस्यापीति । विकल्पेन सविकल्पकेनानुगतो व्यापारः साक्षात्त्वलक्षणो यस्य तादृशात् प्रत्यक्षत एव विविकल्पकात् सिद्धेरित्यर्थः । ननूपलब्धिः स्वरूपमत्यैव विधिव्यवहारे लिङ्गं

मप्यव्यवच्छियमाणमेवानुमितिं भावयेत्। तस्माद्विधि-व्यवहारवन्निषेधव्यवहारो ऽपि प्रत्यक्षसिद्ध एव। विप्रतिपन्नं प्रति तु परीक्षकैस्तर्कः सहायत्वेनोपनेय इति रमणीयम्।

आगमसहायं तर्कमाह। एवं स्वर्गेति। [४२।६] यजेतेत्यत्र समानपदोपात्तत्त्वाद्भाव्यत्वाच्च धात्वर्थः साध्यो भवतु, भवतु वा पुरुषार्थत्वात्स्वर्ग इति संशये तर्कस्या-वतारः—यदि साध्यो धात्वर्थः स्यात् तदोपदेष्टुराप्तत्वं विधेश्चेष्टोपायत्वं वाक्यस्य तदभिधायकत्वं प्रेक्षावतां च

स्यादिति नानवस्थेत्यत आह। न हीति। ननु प्रत्यक्षे न तर्कः सहकारी तर्कं विनापि प्रत्यक्षोदयादित्यत आह। विप्रतिपन्न-मिति। यो ह्यत्र भूतले घटाभावे विप्रतिपद्यते तं प्रतीत्यर्थः। तथा च विरोधिज्ञानपूर्वके साधारणे प्रत्यक्षविशेषे तर्कः सह-कारीति भावः।

समानेति। यजेतेतिपदाद्भावनापि प्रतीयते धात्वर्थो ऽपी-त्यर्थः। भाव्यत्वात्-साध्यत्वादित्यर्थः। साध्यं-फलमित्यर्थः। धात्व-र्थसाध्यत्वपक्षे स्वर्गकाम इति ब्राह्मणत्वादिवदधिकारिविशे-षणमात्रमिति भावः। उपदेष्टुरिति। धात्वर्थस्यैव फलत्वे कर्मणश्च कष्टत्वादकुराप्तत्वं न स्यादित्यर्थः। वाक्यस्येति। इष्ट-

प्रवृत्तिर्न स्यात्, अस्ति चैतत् सर्वं प्रमाणतः सिद्ध-मित्यर्थः ।

अनुज्ञायमानं प्रमाणमाह । समानपदेति । [४२।८] न हि यागभावनायाः स्वर्गफलत्वे धात्वर्थस्यातत्फलत्वे समानपदोपात्तत्त्वधात्वर्थयोः कश्चिद्विरोधः । तस्मात्तद-विरोधेन स्वर्गफलत्वं युक्तं धात्वर्थस्य च साध्यत्वं विरुद्ध-तयाऽयुक्तमित्यर्थः ।

ननु प्रमाणानुग्रहाय युक्तत्वायुक्तत्वे विवेचयति तर्को न तु निश्चिनोति इति कुतो विशेषादित्यत आह । न चेति । [४२।१०] क्रियातिपत्तिरिति । [४२।११] क्रियातिपत्तिः-प्रत्ययोपस्थापिते घटसत्त्वधात्वर्थसाध्यत्वे क्रियातिपत्तिशब्देन विवक्षिते न ह्येवम्भूतप्रत्ययविषयो घटो वा साध्यतया धात्वर्थो वास्तीत्यर्थः ।

किमतो यद्येवमित्यत आह । यदाश्रयेति । [४२।११]

साधनत्वस्य लिङ्पदार्थत्वे यागस्य स्वर्गसाधनत्वं वाक्यार्थ एवे-त्यर्थः । न हीति । भावनाविषयस्य यागस्यैव स्वर्गफलत्वे विरोधो नास्तीत्यर्थः ।

ननु घटसत्त्वधात्वर्थसाध्यत्वे एव न क्रियातिपत्तौ तस्याः क्रिया-व्यतिरेकरूपत्वादित्यत आह । क्रियातिपत्तौति ।

यस्मिन्नाश्रये तुल्योपलम्भनयोग्यत्वेन दुःखत्वेन वा ऽनिष्टप्रसञ्जकेन हेतुना उपपन्नस्तर्को युक्तायुक्तविषय-निश्चयसाधनं भविष्यति स एव नास्तीत्यर्थः ।

तदनेन प्रसज्यमानस्याश्रयासिद्धिसाधनासिद्धी दर्शिते, पूर्वं तु स्वरूपासिद्धिर्दर्शिता । तस्मादारोपत्वान्न स्वविषये प्रमाणं स्वविषयव्याप्यविपर्यये नियामका-

---

नन्वनिष्टप्रसङ्गो घटोपलब्धिरूपो न चानेनायुक्तत्वं निश्चीयते एतस्यैवायुक्तरूपत्वादित्यत आह । यस्मिन्नेति । यद्यत्र घटः स्यात्तदा तुल्योपलम्भयोग्यत्वेन दृश्येत यदि च धात्वर्थः साध्यः स्यात्तदा दुःखत्वेन प्रवृत्तिविषयो न स्यादित्यात्मकस्तर्कस्तत्रैकदेशस्य समुदाये प्रयोजकत्वमस्तीति विवक्षित्वाऽनिष्टप्रसञ्जकेन हेतुनेत्युक्तम् ।

तदनेनेति । तद्भूतलवर्त्तिघटनिष्ठतुल्योपलम्भयोग्यत्वस्य धात्वर्थसाध्यत्वनिष्ठदुःखत्वस्य चानिष्टापादकत्वम् । तत्र भूतलवर्त्तिघटादिराश्रयोऽसिद्धः तुल्योपलम्भयोग्यत्वादिकं च साधनमसिद्धम् । यदा तु भूतल एव धात्वर्थ एव वाश्रये तुल्योपलम्भनयोग्यत्वादिविशिष्टो घटादिः साधनं तदा स्वरूपासिद्धत्वं पूर्वमुक्तमित्यर्थः । तस्मान्न प्रमाणमित्यत्र टीकाकृदुक्तं सङ्गलय्योपपत्तिमाह । तस्मादिति । आरोपितव्याप्यसमुत्थत्वेनारोपत्वान्न तर्को निर्धूमत्वे प्रमाणमित्यर्थः । नाप्यग्निमत्त्व एव तत्प्रामाण्यमित्याह । स्वविष-

भावाच्च । नियतसम्बद्धस्वविषयविपर्ययापेक्षित्वे तु पारतन्त्र्यान्न प्रमाणमित्यर्थः ।

तर्हि क्वास्योपयोग इत्यत आह । निश्चयाय त्विति । [४२।१२]

ननु तर्कप्रमाणयोरभिमतभेदमीमांसया वेदादभेदवादो विरुणद्धीत्यत आह । प्रमाणेति । [४२।१६]

अथ यथाश्रुत एव वार्त्तिकार्थः कस्मान्न भवतीत्यत आह । इतिकर्त्तव्यतात्वं चेत्यादिना । [४२।१७] निकायविशिष्टाभिरित्यस्य व्याख्यानस्य शरीरेन्द्रियाणां शुक्रशोणिताहारादिभूतकार्यत्वात् तत्कार्यत्वाच्च बुद्धिवेदनयोर्निमित्तान्तरे प्रमाणं नास्तीति तात्पर्यम् । विचित्रनिमित्तत्वे साध्ये भेदवत्त्वादिति हेतुः स्वरूपाभिप्रायेणानैकान्तः स्यात् स्वरूपभेदवतामपि घटादी-

येति । वार्त्तिकार्थो-भट्टवार्त्तिकार्थः । तत्र रुमा (१) लवणाकरस्तत्पतितं काष्ठादि लवणात्मतां यथा यातीत्यर्थः ।

ननु जन्मनः कर्मनिमित्तत्वे को विरोधो येन विप्रतिपन्नः पृच्छतीत्यतो विप्रतिपत्तिबीजमाह । निकायेति । स्वरूपेति । यद्यपि स्वरूपभेदवतां घटादीनां निमित्तभेदोऽस्त्येव, अन्यथा कार्यैक्यापत्तिरिति नानैकान्तिकं तथापि परस्परविजातीयानि

(१) रुमा इति पु० पा० ।

नामविचित्रनिमित्तत्वादतः प्रकाराभिप्रायेण व्याचष्टे। विचित्रत्वादित्यर्थ इति। [४२।२२] वैचित्र्यगोत्पादादित्यर्थः।

ननु निमित्तवैचित्र्यमात्रप्रसाधने सिद्धसाधनं, न हि निमित्तं किञ्चिद्विचित्रमस्तीत्येतावतैव धर्माधर्मसिद्धिः धर्माधर्मलक्षणविचित्रनिमित्तसाधनेनान्वयो न व्यतिरेक इत्यत आह। प्रमाणमुक्त्वेति। [४२।२४] निमित्तस्य वैचित्र्ये जन्मनो वैचित्र्यप्रसङ्गः, निमित्तस्यावैचित्र्ये जन्मनोऽवैचित्र्यप्रसङ्गः, यागादीनामेव निमित्तत्वे निरन्वयध्वस्तात्कार्योत्पत्तिप्रसङ्गः, निमित्तस्य

कार्याणि परस्परविजातीयनिमित्तकानीति साध्ये ऽनैकान्तिकत्वम्। न हि यो यद्भिन्नः स तद्भिन्ननिमित्तकोऽप्यवश्यं तद्विजातीयनिमित्तक इति भावः। विचित्रप्रकारवतामपि नित्यानामविचित्रनिमित्तकत्वादनैकान्तिकत्वं माभूदित्यत आह। वैचित्र्येणेति।

तर्कोपयोगार्थमाह। नन्विति। सिद्धसाधनमेवाह। न हीति। धर्माधर्मेऽति। व्याप्तिग्राहकमानविषयीकृते दृष्टान्ते सिषाधयिषितसाध्यविपरीतसहचारावसायेन विशेषाविरोधश्चेति भावः। निरन्वयेति। यद्यपि योनिर्व्यापारविशिष्टायाः क्रियायाः कालान्तरीयफलजनकत्वमुपैति नियतपूर्वसत्त्वस्य विनष्टेऽप्यविरोधात् तं

नित्यत्वे कार्यस्य सदातनत्वप्रसङ्गः, अनेकद्रव्यत्वेऽभ्युदयसाधारणत्वप्रसङ्गः साधारणैकद्रव्यत्वेऽपि स एव दोषः एभिस्तर्कैः पक्षधर्मतामुपजीव्य प्रवृत्तैरनुगृह्यमाणां

प्रति नायमनिष्टप्रसङ्गः, तथापि कालान्तरफलजनकत्वस्य कार्याव्यवहितपूर्वसत्त्वकार्याव्यवहितपूर्ववर्त्तिव्यापारवत्त्वान्यतरव्याव्याप्यत्वनिश्चयाद्यागादिर्यदि निर्व्यापारत्वे सति कालान्तरभाविफलासमानकालः स्यादाशुविनाशित्वे सति कालान्तरभाविकार्यजनको न स्यादित्यापादनार्थः। निमित्तस्येति। ननु यन्नित्यनिमित्तकं तत्सदातनमिति क्वापि न प्रसिद्धं, विपर्ययोऽप्यस्य यदनित्यकार्यं न तन्नित्यनिमित्तकमिति वा अनित्यनिमित्तकमिति वा? नाद्यः अनित्यकार्यस्यापि नित्यहेतुकत्वेन व्यभिचारात्। नान्त्यः सिद्धसाधनात्। न। यदीदमनित्यात्मविशेषगुणजन्यं न तज्जन्यं न स्यादित्यापादनार्थत्वात्। अनेकेति।

ननु यथाऽपेक्षाबुद्धिरन्यत्र समवेताऽप्यन्यत्र घटादौ द्वित्वं जनयति तथाऽदृष्टस्यैकात्मसमवायेऽपि कथं नान्यत्र फलोत्पादकत्वम्। अत्राहुः। यद्येतच्छरीरं जन्यत्वे सत्येतदसाधारणविशेषगुणजन्यं न स्यादेतदीयभोगजनकं न स्यात्। यद्वा कर्त्तृनिष्ठफलदर्शनेन कर्त्तरि तत्सिद्धावन्यत्र तत्कल्पने मानाभाव एवाभ्युदयसाधारण्यमित्यर्थः।

ननु विचित्रकारणकत्वमात्रे साध्ये सिद्धसाधनं, अदृष्टकारणकत्वे च साध्ये विशेषविरोधस्तदवस्थ एवेत्यत आह। एभिरिति।

सामान्यव्याप्तिबलप्रवृत्तं वैचित्र्यानुमानं विशेषविरोधं परिभूयाभिमतविशेषं साधयतीत्यर्थः ।

(इति तर्कनिरूपणम् ।)

ननु ज्ञात्वा (१) किं फलं निर्णयो नास्त्येव येन

तर्कसहकारात्यक्षधर्मताबललभ्यो विशेषः साध्यतयाभिमतस्तत्र न सिद्धसाधनं तत्साधकं च तर्कसहकृतं सामान्यतो दृष्टमेव । विशेषविरोधश्च चतुर्थेऽध्याये निराकरिष्यत इत्यर्थः । वस्तुतः संस्काराजन्यं देवदत्ताद्यशरीरं तद्विशेषगुणजन्यं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निर्मितस्रग्वदित्यतो ज्ञानादिजन्यत्वे बाधकसहकृतादृष्टजन्यत्वं सिद्ध्यतीति भावः । इन्द्रियेति टीका । संशयतर्कौ विना स्वसामग्रीप्रभवमित्यर्थः । ननु निर्णयः प्रमाणानां फलमित्यसिद्धं एकैकप्रमाणजन्यत्वात्तस्येत्यत आह टीकाकारः । अनेनेति । कथाभिप्रायेण प्रमाणानां फलमित्युक्तमिति भावः । तथाऽप्यव्याप्तिः स्यादेवेत्यत आह टीकाकारः । परमार्थत इति । निर्णयपदं निश्चयमात्रपरं न तु विमृष्येत्यादिविशेषपरमित्यर्थः ।

(इति तर्कनिरूपणम् ।)

यथाश्रुते ऽनुपपत्तिमाशयवर्णनौपयिकीमाह । नन्विति । जात्या-

---

(१) ज्ञात्वा इति क्वचित् पाठः ।

कालविशेषं पृच्छति कदा पुनरित्यतोऽभिप्रायमाह। स्यादेतदिति। [४३।२०]

ननु निर्णयोपादानप्रयोजने वक्तव्ये निर्णीत-प्रयोजनस्य तर्कस्य पुनरावृत्तौ किं प्रयोजनमित्यत आह। सङ्कलय्येति। [४३।२२] सङ्कलनया उभयोर-विनाभावो विवक्षित इत्यर्थः।

(इति निर्णयनिरूपणम्।)

"स्वसिद्धान्तानुरूपं साधनं दूषणं चाऽऽहतु"रिति

जन्मना। उत्पत्त्यनन्तरमेव निर्णयः प्रमाणफलमिति कालविशेष-सम्बन्धेन प्रमाणफलत्वाभावात् कालविशेषप्रश्नो ऽसङ्गत इत्यर्थः।

ननु निर्णयोपादानप्रयोजनं नात्र सङ्कलय्योच्यत इत्यत आह। नन्विति। परीक्षकोऽत्रेति टीका। यद्यप्यपरीक्षकाणामपि तर्क-व्याप्त्यादिप्रतिसन्धानवतामेवानुमित्युदयो विविच्य परं वक्तुं न ते समर्थाः तथापि यस्यैव सतर्कात्प्रमाणान्निश्चयः स एवात्र परी-क्षकोऽभिमत इति भावः।

(इति निर्णयनिरूपणम्।)

एकत्रैव साधनं दूषणं चाऽऽहतुरिति भ्रमनिरासायाह।

स्वसाध्यपरसाध्ययोर्यथासङ्ख्यम्। ननु यद्यपि सर्वत्र जल्पे निर्णयावसानत्वमेव नास्ति, क्वचिदनिर्णयेऽपि पुरुषापराधतः कथाविच्छेदात् तथापि यत्र निर्णयावसानत्वमस्ति न ततो जल्पादन्यतराधिकरणनिर्णयावसानत्वेन वादो व्यवच्छेत्तुं शक्यते, न च सर्ववादव्याप्तिः निर्णयस्य वादफलत्वात्, फलस्य चोपायाऽव्यापकत्वादित्यत आह। वादे हीति। [४४।११] निर्णयावसानता हि तद्योग्यताऽभिप्रेता, सा च विवदमानयोः तत्त्वबुभुत्सुतया तमुद्दिश्य प्रवृत्तिः तदिदमुक्तं तत्त्वबुभुत्सोर्वादे(१)ऽधिकारादिति। [४४।१२] तदयमर्थः- तत्त्वनिर्णयमुद्दिश्य तयोः साधनदूषणवचनसन्दर्भो वाद इति, एवञ्च नाव्याप्तिर्न वाऽतिप्रसङ्गः।

स्वसाध्येति। स्वसाध्ये साधनं परसाध्ये दूषणं च अन्योन्यमाहतुरित्यर्थः।

न सर्वत्र जल्पेऽतिव्याप्तिः किन्तु क्वचिदेवेति दर्शयितुमाह नन्विति। तथापि निर्णयावसाने जल्पेऽतिव्याप्तिरव्याप्तिश्च वादे तदवस्थेत्यत आह। निर्णयेति। नाव्याप्तिरिति। वादे कदाचित्तत्त्वनिर्णयाभावेऽपि तदुद्देश्यत्वानपायादित्यर्थः। नातिप्रसङ्ग

---

(१) ह्यनधिकारात् इति २पु० पा०।

जल्पः पुनः कीदृश इत्यत आह । जल्पे त्विति । [४३।१२] पुरुषशक्तीत्युद्देश्यमाह ।

तदयमर्थः-भवतु नाम क्वचिज्जल्पतोऽपि तत्त्वनिर्णयः तथापि नासावुद्देश्यो, न वा श्रद्धेयः, स्वशक्तिपरशक्तिख्यापनमात्रमुद्देश्यमिति । तस्मादन्यतरनिर्णयावसानत्वेनेति । [४४।१४] निर्णयावसानत्वाभिप्रायेणेत्यर्थः ।

(इति वादनिरूपणम् ।)

इति । जल्पे कदाचित्तत्त्वनिर्णये ऽपि तदुद्देश्यत्वाभावादित्यर्थः ।

ननु विचित्राभिसन्धित्वात् पुंसां स्वशक्तिपराशक्तितत्त्वनिर्णयानुद्दिश्य या कथाऽऽरभ्यते नासौ वादः विजिगीषुकथात्वात् । नापि जल्पः तत्त्वनिर्णयोद्देशेन प्रवृत्तत्वात् । स्वपक्षस्थापनावत्त्वेन च न वितण्डा । तस्माल्लाभपूजाख्यातीरनुद्दिश्य प्रवर्त्तित्वं वादलक्षणमिति रत्नकोषकारः । तन्न । तत्त्वनिर्णयविजययोर्व्यावृत्तोपायसाध्यत्वेन सम्भूयोद्देश्यत्वासम्भवात् विजयोद्देश्यतायामप्रतिभाद्युद्भावनं तत्त्वनिर्णयोद्देश्यत्वे च तदनुद्भावनमिति विरोधापत्तेः सम्भवे ऽपि निर्णयोद्देश्यत्वे च तदनुद्भावनमिति विरोधापत्तेः सम्भवेऽपि निर्णयोद्देशेन प्रवर्त्तिततयैव वादत्वात् अभियुक्तैस्तथैव तत्त्व-

ननु जल्पवितण्डयोर्वादविशेषत्वे कथं सामान्य-विशेषयोः परिसङ्ख्यासमभिव्याहारः कथं च परस्पर-विरुद्धयोः सामान्यविशेषभावोऽपीत्यत आह। विशि-ष्येते इति। [४४।१६] "अपरमपि भेदहेतुमाह"। वादा-ज्जल्पवितण्डयोरिति शेषः। पूर्वं वादव्याख्यानावसरे भेदे हेतुरुद्देश्यविशेषाभिसन्धिरुक्तः तदपेक्षयाऽपरम-

निर्णयावसानत्वेन वादव्यवहारात्। अव्याप्तिपरीहाराय व्याचष्टे। निर्णयेति।

(इति वादनिरूपणम्।)

ननु तद्विशेषौ तत्प्रभेदावित्येव कुतो न व्याख्यातमित्यत आह। ननिति। परिसङ्ख्येति। प्रथमसूत्रेण परिसङ्ख्यापदार्थविभाग-स्तत्र वादेन समं जल्पवितण्डयोः कथं समभिव्याहार इत्यर्थः। प्रमेयान्तर्भूतस्य संशयादेरिव नास्य पृथग्वचनं सम्भवतीत्याह। कथं चेति। वार्त्तिककृता जल्पाद्वितण्डामात्रे भेद उक्तः सन्निधानात्, अतस्तदपेक्षयाऽपरमपीति भ्रमनिरासाय शेषमाह। वादादिति। ननु मिलितयोर्जल्पवितण्डयोर्न कश्चिद्वादात् भेदहेतुरुक्तो यदपेक्षया ऽपरमपीति स्यात्, जल्पे वितण्डायां चाङ्गाधिक्याङ्गहान्योरेकैक-त्वेव वादाद्भेदहेतुत्वादित्यत आह। पूर्वमिति। ननूद्देश्यविशेषाभि-सन्धिर्वादजल्पयोरेव भेदहेतुरुक्तो न तु वितण्डाया इत्यत आह।

पीति । [४४।२५] यौ तौ वादजल्पयोः प्रयोक्तारौ तावेकत्राविजिगीषुतया अन्यत्र विजिगीषुतया विशेषितौ वादजल्पौ परस्परतो व्यवच्छिन्दत इत्यर्थः ।

(इति जल्पवितण्डयोर्निरूपणम् ।)

दूषयितुमेकदेशिव्याख्यानं तन्मतेन व्याचष्ट इति

यौ ताविति । जल्पे यो भेदहेतुरुक्तः स वितण्डायामपि समान इति तत्रापि तत्तात्पर्यमिति भावः । यद्यप्यङ्गाधिक्यमपि जल्पवितण्डयोस्तुल्यमिति तदपेक्षयाप्यपरमिति सम्भवति तथापि न सर्वत्र विजयेऽङ्गाधिक्यं, परपराजयोद्देश्यकत्वं तु जल्पवितण्डयोस्तुल्यमिति तदपेक्षयैवाऽपरमपीत्युक्तम् । स्वपक्षस्थापनपरपक्षखण्डनविषयशक्त्यशक्तिख्यापनप्रवृत्तो जल्पः तदन्या विजिगीषुकथा वितण्डेति सङ्क्षेपः ।

(इति जल्पवितण्डयोर्निरूपणम् ।)

भाष्यमेव दूषयितुमेकदेशिमतेन व्याचष्टे इत्यन्वयो न युक्तः एकदेशिमतदूषणेऽपि भाष्यस्यादूषणात् तस्यातदर्थकत्वादित्यत आह । दूषयितुमिति । यद्यपि योजनं यथाश्रुतपदानामेव भवति । न चात्रैकदेशे व्याख्यानपदं श्रुतमस्ति तथापि दूषयितुं व्याचष्टे इत्यत्र दूषणकर्म व्याख्यानमित्येवं परोऽयं ग्रन्थः ।

योज्यम्। उभयथाऽप्यनैकान्तिकत्वादिति। [४५।७] यद्यपि व्यभिचारादर्शनेऽपि अविनाभावो न सिद्ध्यति पृथगभिधानस्य पुरुषेच्छाधीनत्वात्, वादे चोद्भावनीयत्वस्यानुद्भावने तत्त्वप्रतिपत्तिव्याघातहेतुत्वप्रयुक्तत्वात् तथापि व्यभिचारस्य स्फुटत्वात् स एव दर्शितः। तस्मात् "वादे चोदनीया भविष्यन्ती"त्यनेन पृथगभिधानप्रयोजनमात्रं प्रतिपादितं हेतुत्वं पुनरविवक्षितमेव तार्किकम्मन्यैनैकदेशिनाऽऽरोपितमित्यर्थः।

यद्यपीति। यद्यपि हेत्वाभासा वादे देशनीयाः पृथगभिहितत्त्वादित्यत्र पृथगभिधानस्य साधनस्य पुरुषेच्छाधीनत्वं व्यापकमिति नोपाधिः, हेत्वाभासाः पृथगभिहिताः वादे देशनीयत्वादित्युद्भावने तत्त्वप्रतिपत्तिव्याघातकत्वमपि वादादेशनीयत्वस्य साधनस्य व्यापकमिति नोपाधिः, तथापि विपक्षबाधकाभावमात्रमनेन विवक्षितमिति सम्प्रदायविदः।

तथापीति। उपाधेरपि व्यभिचारोन्नायकतया दूषकत्वे स्फुटे व्यभिचारे उपाध्यनुस्मरणस्य व्यर्थत्वादित्याशयः। तस्मादिति। व्याप्यभावाद्धेतुत्वमेकदेश्यभिमतमविवक्षितमेव, किन्तु हेत्वाभासानां वादे देशनीयत्वे मानान्तरसिद्ध एव तात्पर्य्यं सूत्रकारस्य पृथग्वचनेनोन्नीयत इत्यर्थः।

नन्वेवंरूपप्रयोजनलाभोपि कथं ? न हि पृथगभिधानमात्रमत्र प्रमाणयितुं शक्यमित्यत आह । सामान्येति । [४५।१४] सामान्यतोऽभिहितं विशेषतोऽभिदधता सूत्रकृता प्रयोजनविशेषः सूचितः स एव भाष्यकृता दर्शित इत्यर्थः ।

अथ यद्येतदेव विवक्षितमस्य सूत्रकृतस्तदा किमिति न क्वचिच्छास्त्रप्रदेशे स्वयमेव दर्शितवानित्यत आह । एतावानेवेति । [४५।१५]

अथ भाष्यकारेण कथमिदमुन्नीयत इत्यत आह । तत्रेति । [४५।१६] किमेवमपीति । [४५।२०] किमनेन प्रतिपादितेन फलमित्यर्थः ।

नन्वग्रे वादे चोदनीयत्वमेव प्रतिपादयति इह तु विद्याप्रस्थानभेदज्ञापनार्थत्वं वर्णयति तत्कुतो न विरोध इत्यत आह । वादजल्पवितण्डा इत्यादि । [४५।२१] अत्रैवार्थे सूचकं वार्त्तिकमाह । अत एवेति । [४५।२२] अयमर्थः—यदि विद्याशब्देनास्य वादादयो न विव-

---

उत्तरग्रन्थोपयोगार्थमाह । नन्वेवमिति । नहीति । व्यभिचारस्योक्तत्वादित्यर्थः ।

तत्रेतीति । यद्यप्ययं परिशेषो न युक्तः आत्मतत्त्वावबोधक-

चिताः कथमग्रे वादव्यापारं दर्शयित्वा जल्पवितण्डयोः सर्वाण्येव निग्रहस्थानानि व्यापारत्वेनाह तद्यदयमेवं ब्रूते नूनमयमस्यार्थो विवक्षित इति ।

तदयं तात्पर्यसङ्क्षेपः—न तावदज्ञातस्वरूपवदज्ञात-व्यापारफलभेदा वादादयश्चेतनेनाधिष्ठातुं शक्यन्ते न चानधिष्ठितेभ्यः फलसिद्धिः । तस्मात् स्वरूपवद्व्यापार-फलभेदा अप्यमीषां प्रतिपादनीया भवन्ति । अत एव चतुर्थे फलमपि दर्शयिष्यति सूत्रकारः ।

(हेत्वाभासानां पृथगुपदेशोपपादनम् ।)

स्वार्थानुमाने ऽपि हेत्वाभासोद्धारद्वारा हेत्वाभासज्ञानस्योपयोगात् तथापि तत्प्रयोजने सत्यस्य प्रयोजनस्याविरोध एवेति भावः ।

न तावदिति । यथाधिष्ठानस्य ज्ञानसाध्यत्वादधिष्ठेयस्वरूप-त्वमुपदर्श्यते तथा व्यापारतोऽपीत्यर्थः ।

(हेत्वाभासानां पृथगुपदेशोपपादनम् ।)

प्रयुज्येरन्(१)-सम्भाव्येरन्निति । न तु तेषामस्ति-सम्भवति प्रयोग इति ।

ननु लक्षणेन पदार्थस्वरूपं न व्यवस्थाप्यते, अपि तु व्यवस्थितं ज्ञाप्यते तत्कुतो लक्षणतन्त्रत्वमित्यत आह । लक्ष्यत इति लक्षणमिति । [४६।४]

ननु यदि पृथगभिधानेनैव वादे चोदनीयत्वं प्रतिपाद्यते कथं न्यूनाधिकापसिद्धान्तानां पृथगनभिधाने तत्र चोदनीयत्वप्रतिपत्तिः । अथान्यथापि तेषां तद्गम्यत एव, तदा हेत्वाभासेष्वपि स एव प्रकारोऽस्तु कृतं पृथगभिधानेनेत्यत आह । हेत्वाभासानाञ्चेति । [४६।१४]

ननु वादे हेत्वाभासप्रयोगो नायुक्तः पुरुषेच्छामात्राधीनत्वात्तस्येत्यत आह । सम्भाव्येरन्निति । वादे हेत्वाभासानज्ञानतः प्रयुञ्जानस्तत्त्वबुभुत्सुतामेव व्याहन्तीति न तत्र तत्सम्भव इत्यर्थः । एवमस्ति सम्भवतीत्यादिशङ्कापरिहारो अयमेव चेति ।

यदनुद्भावने तत्त्वप्रतिपत्तिव्याघातः स सर्वोवादे देशनीय इति सूचितमेकदेशस्य पृथग्ग्रहणेनेत्यर्थः । अत्र यदनुद्भावने तत्त्वप्रतिपत्तिव्याघातस्तदेवोद्भावनीयं न तु हेत्वाभासन्यूना-

---

(१) प्रसज्येरन् इति. २पु. पा. ।

अयमाशयः—नहि हेत्वाभासाः पृथगभिहिता इत्येव वादे चोदनीयत्वं तेषां गम्यते, अपि तु वादस्य तत्त्वप्रतिपित्सुकथात्वात् हेत्वाभासानां चानुद्भावने तत्त्वप्रतिपत्तिव्याघातात्तत्त्वबुभुत्सुनाऽवश्यमुद्भावनीयास्ते, अन्यथा वादो वादत्वं जह्यात्। हेत्वाभासानां चानुद्भावनं तत्त्वप्रतिपत्तिव्याघातकमिति, अयमेव च न्यायो विशेषतः पृथगभिधानेन सूचितः सूत्रकारेण स च न्यूनादिषु समान इति।

एवञ्च व्यवस्थिते वार्त्तिककृतापि प्रश्नो नाप्रस्ताविक इत्याह। तत्र पृच्छतीति। [४६।१७]

धिकापसिद्धान्तपरिगणनं कर्त्तव्यम्, असाधारणे सत्प्रतिपक्षे च हेत्वाभासानुद्भावने ऽपि तत्त्वप्रतिपत्तेः सम्भवात्। निग्रहस्थानान्तरस्याप्यनुद्भावने तत्त्वप्रतिपत्तिव्याघातस्य वक्ष्यमाणत्वादित्ययमेवार्थः सूत्रकृता सूचित इति केचित्। तन्न; वादमाध्ये तत्त्वनिर्णये साधनद्वयोपस्थितावेकत्र हेत्वाभासोद्भावनस्यावश्यकत्वात्, अन्यथा वस्तुनो विरुद्धद्विरूपतापत्तेः। सर्वहेत्वाभासानुद्भावनस्य तत्त्वप्रतिपत्तिप्रतिघातकत्वे ऽपि किञ्चिद्धेत्वाभासानुद्भावनस्य तथात्वमस्त्येवेत्येतावन्मात्रमेव प्रयोजकं न्यूनाधिकापसिद्धान्तानुद्भावनमपि तत्त्वप्रत्तिं व्याहन्त्येव।

ननु यदि जल्पवितण्डयोस्तत्त्वप्रतिपादनार्थमवतारः किमप्रतिभाद्युद्भावनेन ! अथ न तदर्थत्वं तयोः किं तदवतारेण । न चान्यार्थत्वे तयोरितच्छास्त्रव्युत्पाद्यत्वमित्यत आह । साहङ्कारो हीति । [४६।१९]

अहङ्कृतस्य तस्य तत्त्वप्रतिपत्तेरयोगादहङ्कारशातनेनानयोस्तत्त्वप्रतिपादनार्थत्वं तच्चाप्रतिभाद्युद्भावनं विना न स्यादिति तत्त्वं प्रतिपिपादयिषता कर्त्तव्यमित्यर्थः ।

(वादे निग्रहस्थानोद्भावनविचारः ।)

ननु छलादीनां ज्ञानं न साक्षान्निःश्रेयस उपयुज्यते आत्मादिवत्, नापि तद्व्यवस्थापनद्वारा प्रमाणवत्,

---

ननु साहङ्कारोऽपि विजिगीषुरप्रतिभादिना तिरस्कृत्य पश्चाद्वादेन व्युत्पाद्यत इति किमर्थमुक्तमित्यत आह । नन्विति । न चान्येति । तत्त्वज्ञानप्रयोजके शास्त्रे तदुपयोगिन एव व्युत्पाद्यत्वादित्यर्थः ।

अहङ्कारेति । तथा च परम्परया जल्पवितण्डयोरपि तत्त्वज्ञानोपयोगित्वादितच्छास्त्रव्युत्पाद्यत्वमित्यर्थः ।

(इति वादे निग्रहस्थानोद्भावनविचारः ।)

परिज्ञानफलप्रदर्शनोपयोगार्थमाह । नन्विति । नन्वतावता-

नापि न्यायाङ्गतया संशयादिवत्, न च परिज्ञानमेव फलमपुरुषार्थत्वादित्यत आह। परिज्ञानस्य च फलमुक्तमिति। [४६।२३] तत्त्वप्रतिपत्त्युपायभूतकथात्रय-परिकरशुद्धिद्वारा तत्परिज्ञानं निःश्रेयसोपयोगीत्यर्थः।

"स्वयं च सुकरः प्रयोग" इति ग्रन्थस्य प्रत्यक्ष-सिद्धत्वात् "किमुक्तं भवती"ति स्वरूपप्रश्नो ऽसङ्गत इत्यतः पूरयति। अनेन भाष्येणेति। [४६।२८]

(छलजातिनिग्रहस्थानानां प्रयोजननिरूपणम्।)

भाष्ये प्रयोजनान्तराभिधानं न सूत्रकृदभिहित-प्रयोजनविरोधि, किन्तु तदनुगुणमेवेत्याशयवान् सूत्र-प्रयोजनमनुवदति। सूत्रकारेणेति। [४७।६] अनुगुणत्वं तु व्याप्तिप्रदर्शनेन, न ह्यस्ति सम्भवः पुरुषार्थश्चा-प्रमाणहेतुकश्चेति, तेनायमर्थो भाष्यस्य, यतः सर्वं प्रेक्षा-

---

प्येतच्छास्त्रसाध्ये फले तदुपयोगो नोक्त इत्यत आह। तत्त्वेति। ग्रन्थस्येति। इतिना शब्दस्वरूपस्योपस्थापितत्वादिति भावः।

(इति छलजातिनिग्रहस्थानानां प्रयोजननिरूपणम्।)

ननु भाष्योक्तप्रयोजनव्याख्यावसरे सूत्रकारोक्तप्रयोजनानुवादो व्यर्थ इत्यत आह। भाष्येति। अनुगुणत्वमेवाह। यत इति।

वत्प्रयोजनमान्वीक्षिकीव्युत्पाद्यप्रमाणमूलमतो निःश्रेयसस्य परमपुरुषार्थस्य तन्मूलतायां विपर्ययशङ्कैव नास्ति अतन्मूलत्वे पुरुषार्थत्वहानिप्रसङ्गादिति तदिदमुक्तं नास्त्येव तदिति । [४७।७]

ननु न तावदितरासु प्रमाणव्यवहारो नास्त्येव तदितरव्यवहारस्याप्युच्छेदप्रसङ्गात्, प्रमाणव्यवहारसद्भावे तु किमान्वीक्षिक्या तत्र प्रकाशयितव्यं ? तत्प्रमाणैरेव प्रकाशितत्वादित्यत आह। यद्यपीति। [४७।८] व्युत्पादितेन प्रमाणादिना तत्र व्यवहारस्तद्व्युत्पत्तिस्त्वित एव न तत इत्यर्थः ।

ननु प्रणेतृप्रमाणोपजीवनमान्वीक्षिक्यामपि समान-

निःश्रेयसमेतच्छास्त्रप्रतिपाद्यप्रमाणमूलं पुरुषार्थत्वात् इतरविद्यासाध्यपुरुषार्थवदिति मानमित्यर्थः। नन्वितरविद्यानां प्रामाणिकार्थविषयत्वेऽपि प्रमाणादिव्यवहारो नास्तीत्येतावतैव विद्यान्तरादान्वीक्षिकीभेदः स्यादित्यत आह । नन्वनेनेति(१) । दूषणं निरस्यति व्युत्पादितेनेति । इतरत्र प्रमाणादिव्यवहारे सत्यपि प्रमाणानां गमकत्वनिरूपणमत्रैवेत्यर्थः । एतावतैव दूषणे निरस्ते किमुत्तरग्रन्थेनेत्यत आह । नन्विति । यथाश्रुतो दृष्टान्तो विषम इति

---

(१) नन्विति इति प्रतीकपाठो युक्त इति ध्येयम् ।

मतो न विद्यान्तराद्विशेष इत्यत आह । न तु प्रमाणादीति । [४७।११] प्रमाणोपजीवने समाने ऽपि यथैतद्व्युत्पाद्यमुपजीवन्ति ताः, नैवं तद्व्युत्पाद्यमियमपीत्यर्थः ।

ननु उपजीवकतासाम्ये ऽपि परस्परोपजीव्योपजीवकभावः क्व नाम दृष्ट इत्यत आह। यथेति । [४७।११] प्रत्यक्षादपि हि स्वप्रामाण्यव्यवस्थितये प्रमाणान्तरमपेक्षते, अनुमानमपि स्वोत्पत्तये, तथापि प्रत्यक्षादेवापेक्ष्यानुमानं स्वविषये प्रवर्त्तते न तूपजीवकानुमानमपेक्ष्य प्रत्यक्षादि, अनुमानान्तरं तु स्वप्रामाण्यव्युत्पादकमपेक्षते, तदपि न तदैव, किन्तु प्रागेवेत्यभिप्रायेण व्युत्पाद्यसजातीयापेक्षानिराकरणायोक्तं न प्रत्यक्षादिविषयमपि तदानीमेवेति । [४७।१२] प्रत्यक्षादिरूपो विषयः प्रत्यक्षादिविषय इति । विद्योपकरणं-प्रमा-

---

यत्रार्थे दृष्टान्तस्तमाह । स्वोत्पत्तय इति । अत्र प्रमाणान्तरमपेक्षत इत्यनुषञ्जनीयम् ।

अनुमानान्तरमिति । कर्मपदमपेक्ष्यत इत्यत्र प्रत्यक्षादीति कर्त्तृपदमनुषञ्जनीयम् । किन्त्विति । प्रत्यक्षप्रवृत्त्युत्तरं तत्प्रामाण्यनिश्चयात् पूर्वं प्रामाण्यग्राहकप्रमाणापेक्षेत्यर्थः । ननु पूर्वं प्रमाणविषयापेक्षेति कुतः प्रमाणविषयापेक्षा निषिध्यत इत्यत आह । प्रत्यक्षादिरूप इति । ग्रहणक्रियायां कर्त्तारं पूरयति । इति

णादि । तस्य ग्रहणं "प्रमाणादिप्रकाशितमर्थमितरा विद्याः प्रतिपद्यन्त" इति वार्त्तिकेन ।

एतदुक्तं भवति—वार्त्तिके प्रमाणादिग्रहणं भाष्योक्तविद्याप्रकाशकत्वनिर्वाहाय, न तु स्वातन्त्र्येणातो न विरोधः । तदेवं स्वरूपेणापेक्षां दर्शयित्वा विषयगताऽपेक्षा भाष्यकृता दर्शिता "उपाय" इति। तद्वार्त्तिकं योजयतु व्याचष्टे । संप्रतीति । [४७।१३]

ननु विद्यान्तराणां शब्दात्मकतया प्रमाणत्वात् तस्य च स्वप्रतिपाद्यानपेक्षितत्वात् किं तवान्वीक्षिकी करिष्यतीत्यत आह । न हीति [४७।१४] प्रमाणस्य मतः

वार्त्तिकेनेति । स्वरूपेणेति । आन्वीक्षिकीव्युत्पादितैः प्रमाणैरर्थं निश्चित्य विद्यान्तरप्रणयनादिति भावः । विषयगतेति । विद्यान्तरजन्यार्थनिश्चये ऽप्यान्वीक्षिक्यपेक्षणादित्यर्थः । तद्वार्त्तिकमिति । "उपायः सर्वकर्मणा"मिति वार्त्तिकं योजयितुं तद्भाष्यं व्याचष्ट इत्यर्थः । अप्रमत्तप्रतिषेधमाशङ्क्याह । नन्विति ।

प्रमाणस्येति । एकस्य प्रमाणस्य स्वविषयप्रमितौ प्रमाणान्तरापेक्षायां जातिसङ्करप्रसङ्गादिति भावः । नन्वित्यत्रापि नास्तीत्यनुषञ्जनीयम् । तेन तर्कापेक्षाऽस्त्येवेत्यर्थः । उपलक्षणञ्चैतत् । तात्पर्यग्राहकन्यायस्याप्यपेक्षणात् । इत्यादीत्यादिग्रहणेनावघातस्य

स्वप्रतिपाद्ये प्रमाणान्तरापेक्षा नास्ति न तु स्वेतिकर्त्त-व्यताभूततर्कापेक्षापि, स चान्वीक्षिकीलभ्य इत्यर्थः ।

अथ तर्कमनपेक्षमाणस्य किं स्यादित्यत आह । मा भूदिति । [४७।१७] आदिग्रहणेन "यजमानः प्रस्तर" इत्यादि ग्राह्यम्। तर्कश्च संशयमन्तरेण नावतरतीत्युप-संहारे सोऽपि दर्शितः । यद्यपि सतर्कप्रमाणप्रवृत्ति-रेव परीक्षा तथापीह गोबलीवर्दन्यायेन प्रमाणस्य स्वपदोपात्तत्वात् प्रयोजनजिज्ञासातर्का एव विव-क्षिताः । प्रमाणस्य निवेशः-प्रवृत्तिः तस्य द्वारमविरोधः अर्थतत्त्वं-पदार्थतत्त्वं वाक्यार्थतत्त्वं वा । अवधार्य

यवनीवारादिसाधारण्यं, संमार्गस्य (१) च ग्रहसाधारण्यमान्वी-क्षिकया विना नावस्थाप्यत इत्यादि गृह्यते ।

तर्कश्चेति । प्रमाणेतिकर्त्तव्यताभूतस्य तर्कस्य संशये सत्येव भावादिति भावः । तेन शब्दानित्यत्व गृह्यते । यदि नित्यः स्यात्कृतको न स्यादिति तर्कस्य संशयं विनापि सम्भवे व्यभिचारा-भावः । विवक्षिता इति । परीक्षापदेनेत्यर्थः । प्रयोजनेति । सतर्कप्रमाणस्यैव परीक्षापदवाच्यत्वात् प्रयोजनजिज्ञासयोस्तत्रा-नन्तर्भावेऽपि तर्को न जिज्ञासां विना, सा च न प्रयोजनं विना, इत्यविनाभावात्ते अप्युक्ते । वाक्यार्थतत्त्वमिति । वाक्यार्थे यत्तत्वं

---

(१) संसर्गस्येति क्वचित् पाठः ।

प्रमाणान्तरादर्थवादादेव वा । तत्र त्रयी-विधिनिषेध-रूपा निवेशनीयेत्यर्थः ।

एवं च दण्डनीत्यां यमो राजा कुबेरो वा राजेत्यादि, वार्तायां माघे परिकर्षिता भूमिः स्वर्णमयं फलमाधत्त इत्यादि, तर्कानपेक्षायां विफलायते । तस्मात्तत्रापि तदपेक्षाऽस्तीत्यतिदिशति । एवमिति । [६७।१६] "विषयमिति शेष" इत्यत्रापि विधेयतया निषेध्यतयेतिशेषः ।

इदानीं व्यापारगतामपेक्षामाह भाष्यमतेन । अपिचेति । [४७।१६] द्रव्यस्य यथा "दध्ना जुहोती"-त्यादि, गुणस्य यथा "ऽरुणया सोमं क्रीणाती"त्यादि,

---

तात्पर्यं तदवधार्येत्यर्थः । तेन मानान्तरात् तद्वाक्यार्थतत्त्वावधारणे शब्दस्यनानुवादकत्वं दोषः । अर्थवादादिति । यववराहादिपदार्थावधारणे अनुवादापेक्षणादित्यर्थः ।

विफलायत इति । तर्कावतारं विनोपचारस्याज्ञानादित्यर्थः । विषयत्वे ऽपि प्रकाराकाङ्क्षायामाह । विधेयतयेति । गुणस्येति । यद्यपि गुणपदस्य वैशेषिकगुणपरत्वे सामदानादिश्लेषणाद्यव्याप्तिः विशेषणमात्रपरत्वे द्रव्यकर्मणोरपि तथात्वान्न ततो भेदः स्यात् एवं कर्मपदस्य चलनाद्यर्थत्वे ऽभिमन्त्रणाव्याप्तिः

कर्मणो यथा व्रीहीनवहन्तीत्यादि, दण्डनीत्यामपि यथा "द्रव्यस्य स्वाम्यमात्ये"त्यादि, गुणस्य यथा साम-भेदेत्यादि, कर्मणो यथा "शस्त्रशिक्षागजवाजिवाहन" मिति, वार्त्तायामपि "द्रव्यस्य यथायथर्त्तु बीजं संगृह्णीया"दित्यादि, गुणस्य यथा "भूमिं लावयेच्छो-षये"दित्यादि, कर्मणो यथा "स्थानान्तरं निनीषन्न-नोकहमभिमन्त्रये"दित्यादि, विषयं दर्शयित्वा संशय-माह। तत्र किमिति। [४७।२०]

संशयकारणं च विधिपदसमभिव्याहारस्तत्पदस्य, विधिपदसमभिव्याहृतस्वपदोह्यधिकारी न विधि-विषयस्तथाभूतमेव च अग्निहोत्रं तद्विषयः अतः साध्ये संशयः किं विधिपदसमभिव्याहृतपदत्वात् अग्निहोत्र-

---

धात्वर्थमात्रार्थत्वे तु सर्वमेव कर्मेति न भेदः तथापि साम सान्त्वनं राज्ञां दण्डादिसाध्या प्रतीतिः दानं सङ्कल्पविशेषो भेदश्च पर-शिष्टादेः स्वपक्षेऽनुरागः एवं रूपान्तरपरावृत्तिः श्लेषः शोषश्च जलविभाग इति वैशेषिकगुणा एव विवक्षिताः। अभिमन्त्रणं च मन्त्रकरणकसेकानुकूलश्चेष्टाविशेष इत्येके। गोवृषन्यायमाश्रित्य-भेदोपन्यास इत्यन्ये।

संशयहेतुमाह। संशयेति। कोटिद्वयसाधारण्यमस्याह।

वद्विषयो भवतु स्वर्गोऽधिकारिवद्वा नेति पूर्वपक्ष-मादर्शयं स्तद्वानाय तत्रानिष्टप्रसङ्गमाह। तत्र यदीति। [४७।२२]

न च श्येनादिसाध्याया हिंसाया विहितत्वेनार्थ-त्वमेव भवतु का क्षतिरिति वाच्यम्। विधिर्हि प्रवर्त्तकः स्वज्ञानेनेच्छामन्तरा कृत्वा प्रयत्नोत्पादक इति यावत्। स च प्रयत्नो न साध्यविषयः कर्त्तुं शक्यते उपायो हि प्रयत्नविषयो न तु फलं, तस्मात्प्रयत्नविषयत्वात् साधनेतिकर्तव्यते एव विधीयेते न तु साध्यं तद-विषयत्वात्। न हि ज्ञापकत्वमात्रं विधित्वं अपि

विधिपदेति। विधिममभिव्याहृतस्तदप्रतिपाद्यः (१) स्वर्गकामः पुरुषो न विधेय इत्यर्थः। विधिर्हीति।

ननु फलस्य प्रयत्नागोचरत्वं साध्यतयाऽनुपायतया वा। नाद्यः यागादेरपि प्रयत्नविषयत्वानापत्तेः। न च शरीरादिकमेव प्रयत्न-गोचरो न तु यागादिः तस्योद्देश्यमात्रत्वादिति वाच्यम्। साधनेतिकर्त्तव्यतयोरपि तथा सति प्रवर्त्तकं शास्त्रमाभासः स्यादिति स्वोद्देश्यहानिप्रसङ्गात्। नान्त्यः स्वर्गादेरपि भोगाद्यु-पायत्वमप्रतिसन्धाय तत्साधनगोचराया अपि प्रवृत्तेरभावात्। न च यदुद्देशेन या प्रवृत्तिस्तदुपाय एव तद्गोचरः स्वर्गोद्देशेन

---

(१) विधिसमभिव्याहृतस्वपदप्रतिपाद्य इति युक्तं भाति।

त्विच्छाविषयज्ञापकत्वमिति। तस्माच्छ्येनादिसाध्या हिंसाऽनर्थभूतैवार्थः स्याद्यदि विधिविषयः स्यादिति साधूक्तम्। सिद्धान्ते प्रमाणमादर्शयन्नेव साध्यपदसमभिव्याहारस्तर्हि क्वोपयुज्यते इत्याशङ्कामपनयति। अथ साध्यांशमिति। [४७।२२] इष्टाभ्युपायता हि नेष्टमप्रतीत्य प्रत्येतुं शक्या, न चाप्रतीतैव सा प्रवर्त्तयति अतस्तां विशेष्टुमिष्टस्यानुवादोऽयमित्यर्थः।

मण्डलीकरणगोचरकृत्युत्पत्तेः। अत्राहुः—विधिवाक्यं न यागादेः साक्षात्प्रवृत्तिविषयतां बोधयति येनोद्देश्यहानिः स्यात् अपि तूपायतां, तथा च तदसिद्धिदशायां सिद्धे तदुपाये प्रवृत्तिः तत्सिद्धौ च तत्र प्रवृत्तिः। न चैवं फले ऽपि तत् सम्भवः प्रवर्त्तकेष्टसाधनता ज्ञानाभावात्। यद्वा स्वर्गस्यापि भोगसाधनत्वज्ञानं न यागादौ प्रवृत्तिप्रयोजकं किन्तु भोगविषयत्वज्ञानम्। तथाच फलस्यानुपादेयत्वेन ज्ञानाद्यथा स्वर्गो न प्रवृत्तिविषयस्तथाऽभिचारस्याप्यनुपायत्वेन ज्ञानान्न प्रवृत्तिविषयत्वमिति।

साध्यांशस्यानुवादप्रयोजनमाह। इष्टाभ्युपायता हीति। नन्विष्टसाधनत्वबोधकादेवेष्टज्ञानमपि स्यात् किं तदर्थेनानुवादेनेत्यत आह(१)इति। सामान्यत इष्टज्ञानतत्साधनत्वज्ञानसम्भवे ऽपि विशिष्येष्टज्ञानं विना न प्रवृत्तिः। बलवदनिष्टानुबन्धित्वज्ञानस्य

---

(१) न च इत्यावश्यकमिति भाति।

तत्किमिदानीमविहितमित्येतावताऽनर्थो ? नेत्याह । न हिंस्यादिति । [४७।२७]

ननु भवत्वेवं तावत्तथाप्यान्वीक्षिक्याः किमायातमित्यत आह । तदिहेति । [४७।२७] विषयान्तरमाह । एवमिति । [४७।२८]

प्रवर्त्तकत्वात् । तच्चेष्टतावच्छेदकज्ञानसाध्यमिति तदर्थमिष्टस्य विशिष्यानुवाद इत्यर्थः ।

तत्किमिति । तथा सति स्वर्गोऽप्यविधेयतयाऽनर्थः स्यादिति भावः । न च निषेधादेव हिंसाया अनर्थत्वस्य सिद्धत्वादविहितत्वेनेति व्यर्थमिति वाच्यम् । यदि हिंसा विहिता स्यात्तदा निषेधे सत्यपि सर्वभूताहिंसाश्रुतिश्चेतच्छागालम्भनश्रुत्योरिव सामान्यविशेषन्यायावतारः स्यादित्यविहितत्वस्यापि सप्रयोजनत्वात् । अथ विरोधे सति तदवतारः यथा "पदे जुहोति अप्सु जुहोती-" त्यादौ, भिन्नप्रकरणाम्नातस्य होमविशेषस्य सन्निधिश्रुतप्रकरणान्वितत्वान्नाधिकरणाकाङ्क्षा "अत आहवनीये जुहोती"त्यत्र होमत्वेन तदन्यहोमस्याधिकरणाकाङ्क्षायामाहवनीयान्वयः । श्वेतच्छागालम्भने तु पुरुषस्य प्रत्यवाये ऽपि क्रतोरुपकारो भविष्यतीति न विरोधः । ननु बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य विध्यर्थत्वे तत्र नञोऽन्वये विशेषणाभावाद्बलवदनिष्टाननुबन्धित्वपर्यवसाने विधिनिषेधयोर्विरोधात् ।

यथा आमिक्षायाः प्रयोजकत्वं क्षीरहोमस्थाने तद्विनिवेशनाद्रसादिसाम्यात् वाजिनस्याप्रयोजकत्वं अवर्जनीयमात्रोत्पत्तिकत्वात्। आदिग्रहणेन शेषभाग-होमविलोपादयो गृह्यन्ते। सर्वा विद्या इति विद्या-शब्देन तद्धर्मान् लक्षयतीति न भाष्यव्याख्याविरोधः। वार्त्तिककारस्तु—धर्माणां विद्यापारतन्त्र्यं विवक्षन्निति शेषः। सङ्करप्रसङ्ग इति [४८।६] फलस्य। तथाच विद्यान्तरफलेनैवास्याः फलवत्त्वं न पुनरसाधारणं

यथेति। "तस्मै पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मित्यत्र दध्यानयनप्रयोजकत्वमामिक्षाया न तु वाजिनस्य, पाठात् प्रथमोपस्थितः वैश्वदेवीत्यत्र "मास्य देवते"तिविहित-तद्धितस्य देवतासम्बन्धोपस्थापकत्वेनामिक्षायागस्य प्रतीतेश्च। तत्रामिक्षाया दुग्धरसमाम्याद्रसतस्तत्रेति जैमिनीयसूत्रात्तत्रा-भिनिवेशो वाजिनस्यामिक्षाजलस्य अन्यार्थप्रवृत्त्यैवोत्पादनात्। तदपवादे वाजिनहोमलोप एवेत्यर्थः। ननु सर्वधर्माश्रयत्वेऽपि न सर्वविद्याश्रयत्वमान्वीक्षिक्या इत्यत आह। विद्याशब्दे-नेति।

वार्त्तिककारीयव्याख्यानबीजमाह। धर्माणामिति। तथा च विवक्षा परं भिद्यते फलतस्त्वविरोध इत्यर्थः। निःश्रेयसेनोपायसङ्कर-भ्रमं निवारयति। फलस्येति। ततः किमित्यत आह। तथा

फलमस्या अस्तीत्यर्थः । असाङ्कर्यं दर्शयितुं तासामेव तावदसाधारणं फलमाह । विद्यान्तराणीति । [४८।१०] एतस्या असाधारणं फलमाह । इह त्विति । [४८।१२] अन्यत्रास्याः प्रतिपादितोपयोगविरोधो माभूदित्याशयवतोक्तं प्रमाणादि यद्यपि साधारणमिति । [४८।१२] एतेनैतदुक्तं भवति—विद्यान्तरफलान्यपि यदान्वीक्षिक्यामायतन्ते संयमूष्मासिद्धिरस्याः । यत्तु प्रधानमस्याः फलं तदसङ्कीर्णमेव विद्यान्तरेष्वसम्भवादिति ।

(इति आन्वीक्षिकीप्रयोजनकथनम् ।)

चेति । तासामिति । विद्यान्तरासाधारणफलबोधे आन्वीक्षिक्या असाधारणफलासाङ्कर्यस्याभ्युपगमादित्यर्थः । आयतन्ते—आयत्तानि भवन्तीत्यर्थः । उष्मासिद्धिः—अन्योद्देशप्रवृत्तादपि तत्सिद्धिरित्यर्थः ।

(इत्यान्वीक्षिकीप्रयोजनकथनम् ।)

वादादीनामिति अतद्गुणसंविज्ञानो बहुव्रीहिः वादस्य पराभिभवार्थमप्रवृत्तेः, जल्पादयो हि मदादिहेतवः पराभिभवोपायत्वात् द्रव्यसंपत्तिवदिति प्रयोगः। तत्रास्य विरुद्धत्वं तावदाह। तत्र जल्पादीनामिति। [४८।१९]

अयमाशयः—न तावत्प्रतिपाद्यस्य जल्पवितण्डयोरधिकारः, किन्तु प्रतिपन्नस्य तत्त्वप्रतिपत्तिपालनार्थं दुरवलिप्तप्रतिपादनार्थञ्च तयोरधिकारः, पराहङ्कारशातनञ्च मदमानादिविरुद्धमेव तेषां दोषविशेषत्वात्, अहङ्कारशातनस्य तन्निरोधरूपत्वात्। न च पराभिभवोपायभूतशब्दवाच्यतामात्रेणानुमानं, वागादीनामपि विषाणित्वप्रसङ्गात्।

ननु तत्र जल्पादीनामित्यनेन न कश्चिद्धेतुदोष उक्तः किन्तु हेतोः सिद्धिरेवोक्तेत्यत आह। तत्रेति। ननु यस्याहङ्कारशातनं तस्य मदाद्यहेतुत्वे ऽपि शातयितुस्तद्धेतुत ऽस्त्येवेत्यत आह। अयमिति। तस्यापि पराहङ्कारशातनं न द्वेषप्रयुक्तं किन्तु करुणया तत्त्वप्रतिपादनप्रयुक्तं, जिगीषापि तदर्थैवेत्यर्थः।

अत्र पक्षे पराहङ्कारशातनं पराभिभवः दृष्टान्ते तु चपेटादिरित्यर्थभेदे ऽपि यदि पराभिभवोपायशब्दवाच्यत्वसाम्येनानुमानं

स्यादेतत् पराभिभवोपायत्वेन हेतुना मदमानादिहेतुत्वं मामैत्सीत्, अन्वयव्यतिरेकाभ्यामेव सिद्ध्यत्वित्यत आह। मदमानादिहेतुत्वञ्च हेतुरसिद्ध इति। [४८।२२] "सति च तत्त्वविदां न सम्भवती"ति वदता यथाश्रुतस्य पराभिभवोपायत्वस्यानैकान्तिकत्वमपि सूचितम्। अतो जल्पादितत्त्वज्ञानवतामपि यदि मानादयो दृश्यन्ते न ते तद्धेतुकाः, किन्तु बलवन्मिथ्याज्ञानहेतुका एवेति सनकाद्युदाहरणफलमिति। एतच्च स्फुटमित्यभिप्रायेणाह। उपसंहरतीति। [४८।२२]

(इति वादादिज्ञानस्य मदादिहेतुत्वनिरासः।)

(प्रथमसूत्रव्याख्यानं समाप्तम्।)

तदा वाग्विषाणिनी गोत्वात्सुरभिवदित्यनुमानं स्यादित्यत आह न चेति। हेतोर्दूषणान्तरे तात्पर्यमाह। पराभिभवेति। दूषणान्तरसम्भवं तदनुद्भावनबीजं चाह। सति चेति। मदादिप्रधानोदामविशेषः—सनकः।

(इति वादादिज्ञानस्य मदादिहेतुत्वनिरासः।)

(इति प्रथमसूत्रव्याख्यानं सम्पूर्णम्।)

अप्रतीतस्वरूपस्य प्रयोजनाभिसम्बन्धस्य परीक्षा न युज्यते निराश्रयत्वात् प्रथमसूत्रमुद्देशपरमेवेत्यत आह, तदेवमिति । [४८।२५] अभिधेयसम्बन्धप्रयोजनपरादेव तस्मादुद्देशोप्यवगतः स चापेक्षितत्वात् गृहीत

ननु प्रमाणादिपदार्थानामुद्देशकथनं व्यर्थं तेषामत्रापरीक्षणीयत्वादित्यत आह । अप्रतीतेति । आद्यसूत्रस्य प्रयोजनाभिसम्बन्धपरत्वे प्रमाणादीनामुद्देशाभावात्तल्लक्षणपरीक्षयोरनवसरः प्रमाणाद्युद्देशपरत्वे प्रयोजनसम्बन्धपरीक्षानुपपत्तिः तस्यानभिधानात् उभयपरत्वे च वाक्यभेदापत्तिरित्यर्थः । अभिधेयेति । प्रवर्त्तनीयप्रवृत्त्यर्थं प्रमाणादितत्त्वज्ञानस्य निःश्रेयसहेतुतायामाद्यसूत्रस्य तात्पर्ये ऽवधृते तत्त्वज्ञानविषयाः प्रमाणादयो ऽपि धर्मिण उपस्थिता इत्येकोपस्थित्यैवोभयनिर्वाहान्न वाक्यभेद इत्यर्थः ।

ननु धर्म्युपस्थितावपि तस्य न्यूनाधिकसङ्ख्याव्यवच्छेदपरत्वे मानाभावः तस्यापदार्थत्वात् । तत्र तात्पर्यान्नायकस्य चाभावात् । न ह्यत्र प्रथमं पदार्थसामान्योपस्थापकमस्ति येन सामान्योपस्थितौ सत्यां विशिष्याभिधानस्य न्यूनाधिकसंख्याव्यवच्छेदपरत्वमवगम्येत । अत्राहुः— तत्त्वज्ञानादित्यत्र तत्त्वपदादेव पदार्थसामान्ये लब्धे यत्प्रमाणादिरूपविशेषोपादानं तदितरव्यवच्छेदतात्पर्यान्नायकं, व्यवच्छेद्यं च यद्यपि युक्तिशास्त्रतया नैतत्सूत्रं शब्दविधया बोधयति, किन्तु युक्तिद्वारा, युक्तिश्च परीक्षैकवाक्यतालभ्येति

इत्यर्थः। एतेन परीक्षाविषयो दर्शितः। उचितं दर्शयन्नेव तदतिक्रमे हेतुमाह। तेषामिति। [४८।२६] एतेन फलतः सम्बन्धपरीक्षायाः प्रयोजनमपि दर्शितम्। अभिधानद्वैविध्य-मुभयकोटिसंस्पर्शः। समीचीनमित्याद्यनुरोधेन यथा वार्तिकादीत्यादावार्थः क्रमो ग्राह्यः। तस्मादभिधानसामान्यात्—अभिधानसाधर्म्यमात्रात्

परीक्षायां तत्तात्पर्यावश्यकतयोद्देशस्यापि तत्र तात्पर्यकल्पने मानाभावः अनन्यलभ्य एव तत्र तात्पर्यकल्पनात्, तथापि परीक्षावाक्यद्वारैवोद्देशस्य व्यवच्छेदे तात्पर्यमित्येवम्परोऽयं ग्रन्थः।

ननूद्देशानन्तरं लक्षणपरीक्षयोरत्राभावात् किं तत्कीर्त्तनेनेत्यत आह। उचितमिति। उद्देशानन्तरमेव लक्षणपरीक्षयोरौचित्यमित्यर्थः। एतेनेति। निःश्रेयसार्थिनां तज्जनकप्रमाणादिलक्षणपरीक्षाविषया प्रवृत्तिः प्रयोजनम्। न ह्यपरीक्षिते प्रयोजनसम्बन्धे तत्र तेषां निष्कम्पा प्रवृत्तिः सम्भवतीति भावः।

नन्वभिधानस्य द्वैविध्यं समीचीनासमीचीनत्वरूपमत्र विवक्षितं न च किमप्यभिधानमुभयरूपं दृष्टमित्यत आह। उभयेति। तथा चाभिधानत्वमुभयकोटिसहचरितं दृष्टमतस्तस्मादत्र संशय इत्यर्थः। यथासङ्ख्यमन्वये विरोधादन्यथा व्याचष्टे। समीचीनमिति। ननु साधारणधर्ममात्रं न संशायकं तस्य

निर्णायकरहितात्, दृश्यमानादिति यावत्। उभयथा दर्शनाच्चेति। [४६।४[तत्सहचरितोभयकोटिदर्शनजसंस्कारभुवः स्मरणादिति यावत्। एतच्च सूत्रकारस्याऽऽप्तत्वावधारणात् प्रागिति मन्तव्यम्। यद्यपि चाऽऽप्तवचन एव साक्षात्संशयं दर्शयति तथापि

विशेषदर्शनेऽपि सति भावात् न च तदप्यज्ञायमानं तथेत्यत आह। निर्णायकेति।

ननूभयथादर्शनं चिरातीतं न संशयहेतुरित्यत आह। तत्सहचरितेति। न चोभयकोटिसंस्कारादेव संशयोत्पत्तौ किं स्मरणेनेति वाच्यम्। संस्कारजन्यत्वे तस्य स्मृतित्वापत्तेः। स्मृतित्वे तस्यैव तत्त्वत्वात्। अत एव प्रत्यभिज्ञानेऽपि तत्तास्मृतेर्हेतुत्वं वक्ष्यति द्वितीयेऽध्याये टीकाकारः। न च व्यवहितविशेषणज्ञानजन्यं विशिष्टज्ञानमिति न तस्य संस्कारजन्यत्वमिति परीहारो गौरवात्। एतच्चेति। एतत्संशयस्वरूपमित्यर्थः। अभ्युपगमवादश्चायम्। सूत्राणामाप्तोपदेशतया प्रामाण्ये युक्तिशास्त्रव्याघातात्। ननु भाष्ये निःश्रेयसं परीक्ष्यतया प्रतिज्ञातं टीकायामभिधाने संशय उक्तः सम्बन्धश्च परीक्षित इति विरोध इत्यत आह। यद्यपीति। अभिधानसंशयस्याप्यभिधेयसंशयपर्यवसानादर्थनिश्चयादेव तदर्थिप्रवृत्तेरर्थ एवात्र परीक्ष्य इत्यर्थः। ननु सम्बन्धस्य कार्यकारणभावस्य प्रतीत्यप्रतीतिभ्यां व्याघातान्न परीक्षेत्यत आह।

तद्वाराऽर्थ एव द्रष्टव्य इति। सम्बन्धिनि च प्रयोजने तत्त्वज्ञानकार्यतया परीक्ष्यमाणे सम्बन्ध एव कार्य-कारणभावलक्षणः परीक्षितो भवतीति तदेव परीक्ष्य-तया निर्दिश्यते "तच्च खलु वै निःश्रेयसमिति। वस्तुतस्तु सम्बन्धपरीक्षेयमित्यतो न प्रतिज्ञासंशय-परीक्षाणां वैयधिकरण्यमिति। तत्रेति—सूत्रे व्याख्या-तव्ये। उत्सूत्रेणेति। [४६।४] पूर्वपक्षं विना सिद्धान्त-सूत्रस्यावताराभाव इत्याशयः।

ननु जीवन्मुक्तिपक्षे "तद्वतामवस्थानं न स्या"दिति चोद्यमनवकाशमित्यत आह। तदत्यन्तेति। [४६।६]

सम्बन्धिनि चेति। तथा च प्रयोजनस्य तत्त्वज्ञानकार्य्यतया या परीक्षा तस्य एव सम्बन्धपरीक्षारूपत्वं संशयोपि निःश्रेयसं तत्त्वज्ञानकार्य्यं न वेति परीक्षाङ्गमित्यर्थः।

वस्तुतस्त्विति। उक्तरीत्या भाष्यकारस्यापि सम्बन्धपरीक्षाया-मेव तात्पर्यमित्यर्थः। ननु तत्रेत्यनेन सन्निधानात् संशयपरामर्षे संशयस्य टीकाकृदुक्तत्वात्तस्मिन् सति भाष्यमित्यसङ्गतिः, न वा टीकाकृदुक्तो वाक्यविषयः संशयोऽत्र परीक्षाङ्गमित्यत आह। सूत्र इति। ननु पूर्वपक्षभाष्यमित्ययुक्तं भाष्ये जिज्ञासामात्रश्रवणादि-त्यत आह। पूर्वपक्षमिति। विप्रतिपन्नस्य पूर्वपक्षं मनसि कृत्वैव जिज्ञासेत्यर्थः।

ननु माभूत्तत्त्वज्ञानानन्तरमेव निःश्रेयसं का नो हानिः न ह्येवं प्रतिज्ञातमस्माभिरित्यत आह। तथा सतीति। [४६।८] यद्यपि साक्षादेवं न प्रतिज्ञातं तथापि तत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावः सूत्रकृता दर्शितः स चानन्तर्यनियम एव स्यान्नातोऽन्यथेति पूर्वपक्षी मन्यत इत्यर्थः। तदिदमुक्तं मिथ्येति। [४६।९]

ननु तथापि "तदत्यन्तविमोक्षोपवर्ग" इत्येतावदेव निःश्रेयसमिति केन प्रतिज्ञातं यावता जीवन्मुक्तिरपि निःश्रेयसं भवत्येवेत्यत आह। न चान्यदिति। [४६।९]

अभिसन्धौ बीजं तत्त्वज्ञानस्योत्पन्नस्यापवर्गे कर्त्तव्ये

नन्वत्रापवर्गलक्षणमनवसरपराहतमिति किं तत्कीर्त्तनेनेत्यत आह। नन्विति। तद्वतां तत्त्वज्ञानवताम्।

"तथा सती"त्यपि टीकाया "स्तस्मा"दित्यादिपूर्वटीकया पौनरुक्त्यं निराकर्त्तुमाह। नन्विति।

ननु तथापि तदनन्तरमेवेति न प्रतिज्ञातमत आह। यद्यपीति। स चेति। तत्त्वज्ञाने सत्यपि यदपेक्षया कार्याभावस्तदेव कारणमतस्तेनान्यथासिद्धं तत्त्वज्ञानमकारणमेव। व्यापारव्यापारिभावे च मानाभाव इत्यभिमानः परस्येत्यर्थः।

अभिसन्धाविति। तत्त्वज्ञानस्यात्यन्तदुःखविमोक्षरूपापवर्गे

ऽपेक्षणीयाभावः भावे वा तदेवापवर्गसाधनं न तत्त्वज्ञानमिति ।

तदिदमुक्तं वार्त्तिककृता "सत्यपि तत्त्वज्ञाने यस्याभावान्नापवृज्यते सोऽन्योर्थ" इति । स्फुटं वार्त्तिकमिति टीकार्थः ।

सूत्रसमुत्थतां सिद्धान्तवार्त्तिकस्य दर्शयितुं सूत्रमवतारयति । अत्रेदमिति । [४६।६]

यथाश्रुतं वार्त्तिकं न पूर्वपक्षाच्छादकं न ह्यपरमपि निःश्रेयसं शास्त्रीयात्तत्त्वज्ञानात्साक्षाद्भवतीति यस्माच्च साक्षाद्भवति न तच्छास्त्रीयमिति भूमिमारचयति । चतस्रो हीति । [४६।११]

सा चान्वीक्षिक्यामायतते-आयत्ता भवति । तत्परिकरोपयोगमाह । आन्वीक्षिकी चेति । [४६।१४]

कर्त्तव्ये ऽपेक्षणीयान्तराभावेन तदनन्तरमेवेति प्रष्टुमुक्त्युपपत्तौ (?) जीवन्मुक्तेः काल एव नेत्यर्थः ।

ननु सूत्रमग्रे वार्त्तिककृतैवावतार्य्यमित्यन्तरा किं तदवतारणेत्यत आह । सूत्रेति ।

प्रतिपक्षान्तरकथनस्यार्थान्तरत्वं निराकर्त्तुमाह । यथाश्रुतमिति । शास्त्रीयादिति । एतच्छास्त्रसाध्यमननरूपादित्यर्थः । यस्मादिति । निदिध्यासनजन्याऽऽत्मसाक्षात्कारादित्यर्थः ।

ननु श्रवणस्य तावदाकाङ्क्षोत्थापनेनोपयोगः मननस्याप्येवमेवेत्यवधारणेन, तत्किमपरमवशिष्यते यदर्थं प्रतिपत्त्यन्तरोपासनं, नहि निश्चयातिरिक्तं कस्यचित् प्रमाणस्य फलमित्यत आह। न चायमिति। [४६।१७]

अयमाशयः—नहि निश्चयो निश्चयत्वेन मोक्ष उपयुज्यते, किं नाम ? (१) मिथ्याज्ञाननिवृत्तिद्वारा। न चापरोक्षविषयो मोह औपदेशिकेनाऽऽनुमानिकेन वा तत्त्वनिश्चयेन निराकर्त्तुं पार्यते, तदुपायानुष्ठानेन तु

निषेध्यस्य परिशेषस्य सम्भवमाह। नन्विति। आकाङ्क्षेति। धर्मिज्ञानं विना तत्प्रकारविशेषजिज्ञासानुत्पत्तेर्न मनने प्रवृत्तिरित्यर्थः। मननस्यापीति। श्रुतावेवात्मनि विरुद्धनिरञ्जनत्वकर्त्तृत्वादिकथनात्तत्र तात्पर्यसंशये एतत्प्रकारक एवायमित्यवधारणेन मननस्योपयोग इत्यर्थः। किं नामेति। मिथ्याज्ञानप्रागभावाऽसहकृतमिथ्याज्ञानध्वंसद्वारेत्यर्थः। मिथ्याज्ञानध्वंसमात्रस्य तत्त्वज्ञानं विनापि विरोधिगुणादुत्पत्तेस्तद्व्यापारत्वायोगात्। न चेति। शरीरादिभिन्नात्मानुमितावपि पुनर्गौरोऽहमिति भ्रमदर्शनादित्यर्थः।

न चैवं श्रवणमननयोरनुपयोग एवेत्याह। तदुपायेति।

(१) किन्तु इति २पु० पा०।

तयोरुपयोगः । तस्माद् ये वेदान्तिनो वाक्यार्थज्ञानादेव मुक्तिमिच्छन्ति ते प्रष्टव्याः किं भवतां वस्तुसन्तमुपायोपेयभावसम्बन्धमभ्युपगम्य प्रवृत्तिः संवृतिसन्तं वा, आद्ये अद्वैतसिद्धान्तक्षतिः, कार्यकारणभावस्य भेदाधिष्ठानतया तयोः पारमार्थिकत्वे भेदस्यापि पारमार्थिकत्वप्रसङ्गात् । द्वितीये तु किमविशेषेण प्रवृत्तिर्यथासंवृतिव्यवस्थं वा । आद्ये भोगिनोऽप्यपवृज्येरन् । द्वितीये तु न शाब्दादानुमानिकाद्वा तत्त्वज्ञानादैन्द्रियकव्यामोहविगमः । किं तर्हि ? साक्षात्कारादेव दृष्ट इति तथैव तदर्थिनः प्रवृत्तिर्युक्ता । न च वाच्यं वाक्यादेवात्मसाक्षात्कारोदय इति, तस्य केवलस्य सामर्थ्यानुपलम्भात् । यदि तु

उपपत्तिं विना विवेकाभावात् सन्दिग्धस्य न निदिध्यासने प्रवृत्तिर्न वा धर्मिज्ञानं विनोपपत्तौ मनने प्रवृत्तिः स्यादित्यस्तूपयोगस्तयोरित्यर्थः । वाक्यार्थेति । आत्मप्रतिपादकवेदवाक्यार्थज्ञानादित्यर्थः । संवृत्तिसन्तं—वैज्ञानिकम् । यथेति । संवृतिसिद्धेऽपि जगति यस्माद्यद्दृश्यते तत्रैव तदर्थिनः प्रवृत्तिरित्यर्थः । तस्येति । वाक्यार्थविषयसाक्षात्कारोऽपीन्द्रियजन्यो वाक्यन्तु परम्परयोपयोगीत्यर्थः ।

यदि त्विति । आत्मनो ज्ञानरूपत्वात्तस्य च स्वप्रकाशतया आत्मनि साक्षात्काररूपत्वात्तत्र किं साक्षात्कारान्तरेणेत्यर्थः ।

स्वसंविदितस्वरूपतया किं तत्र ध्यानादिकमपूर्वमाधास्यतीत्युच्यते ? तदा श्रुतेरपि वैफल्यमनेन न्यायेन। यदपि भौतदर्शकनदीमन्तरणमुदाहरणं। तत्रापि न केवलेनैव वाक्येन साक्षात्कारः किन्तु चक्षुरादिनैव। अत्रापि मनसा सहकृतेन भविष्यतीति चेत्। न। अनेकधा श्रुतश्रुतेरपि सत्यपि च पटीयसि मनसि ब्रह्मसाक्षात्कारामावात्। तत्कस्य हेतोः ? भौतानामिव स्वशरीरे चाक्षुषस्य दृढतराभ्यासस्य मुमुक्षोर्मानसस्याऽऽत्मन्यभावात्। तस्मात्तदर्थमभ्यास एव शरणम्। तदिदमुक्तं लोकसिद्धमिति। [४६।२०]

यदपीति। वर्वरदेशगतये नदीं मन्तीर्णं सर्वः स्वं स्वमनन्तर्भाव्य नवैव गणयन् यदाऽन्येन बोध्यते त्वं दशम इति, तदा शब्दादेवास्य स्वशरीरसाक्षात्कारः तथाऽऽत्मनापि स्यादित्यर्थः। तत्रापीति। तत्रापि परवाक्यादुत्पन्नजिज्ञासश्चक्षुरादिनैव स्वदेहं साक्षात्करोति न तु वाक्येन्द्रियाभ्यामेकः साक्षात्कारस्तत्रोत्पाद्यते, शब्दं विनापि केवलेन्द्रियात् साक्षात्कारोदयेन व्यभिचाराज्जातिसङ्करप्रसङ्गाच्चेति भावः। अनेकधेति। श्रुतेः शरीरभिन्नात्मज्ञानेऽप्यहं गौर इत्यादिमतेरुत्पत्तेरित्यर्थः। भौतानामिवेति। यथा भौतानां स्वदेहे चाक्षुषो दृढतरस्तत्त्वाभ्यासस्तथा न मुमुक्षोरात्मनि मानसः साऽस्तीति नात्मनः सकृच्छ्रवणात् साक्षात्कारसम्भव इत्यर्थः।

लोकसिद्धः कार्यकारणभावस्तात्त्विको भवतु मा वा भवतु, सर्वस्य पुरुषार्थप्रवृत्तस्य तावत् स एव शरणं, तदनादरे तु पुरुषार्थोऽप्यनादरणीयस्तुल्ययोगक्षेमत्वादिति ।

यदि नाम चतस्रः प्रतिपत्तयः आत्मादौ प्रमेये, प्रकृते तु किमायातमित्यत आह । अथेति । [४८।२३] एतदुक्तं भवति—यदि श्रौतमानुमानिकं वा तत्त्वज्ञानमादाय पूर्वपक्षः तदाऽनभ्युपगम एवोत्तरं, न हि तस्य साक्षान्निःश्रेयसहेतुत्वमाचक्ष्महे । किं तर्हि ? परंपरया, सैव "चतस्रो ही"त्यादिना दर्शिता । तस्मात्मा-

"तज्जनिता च वासने"ति टीका । अत्र दिङ्मोहादौ विशेषदर्शने सत्युत्तरकालं प्राच्यां मा प्रतीचीति न स्मरणं किन्तु प्रतीचीत्वेन मया प्राच्येव ज्ञातेति स्मृतिः अतस्तत्र संस्कारनाशः कल्प्यत इति मानमाहुः । न च विशेषविस्मरणे सति तथा स्मृतिर्भवत्येवेति वाच्यम । योगिनस्तत्त्वसाक्षात्कारस्वरूपविशेषदर्शनसन्ततेः सत्त्वात् ।

जीवन्मुक्तवर्णनस्यार्थान्तरत्वमाशङ्क्याह । यदि नामेति । जीवन्मुक्तवर्णनस्याऽऽत्मसाक्षात्कारात् साक्षादेवापरनिःश्रेयसं सिद्ध्यतीति प्रकृतोपपादनमेव प्रयोजनमिति परिहारार्थः ।

ननु तथापि शास्त्रीयात्तत्त्वज्ञानात्तद्भवतीति न साधितमित्यत आह । एतदुक्तमिति । किं तर्हीति । न च मननस्य

साक्षात्कारमादाय पूर्वपक्षः तस्य हि साक्षादेव निःश्रेयस-हेतुताऽभ्युपगम्यते, तत्रोभयपरिहारार्थं निःश्रेयसद्वै-विध्यप्रतिपादनमुपस्थाप्यत इति भावः।

अथेत्याद्युच्यत इत्यन्तेन (१) पूर्वः पूर्वो हेतु-रुत्तरोत्तरस्तद्वानिति।

ननु साक्षात्कारवांश्च देहवांश्चेति दुर्घटमिदं, न हि श्रवणादेरिव परे निःश्रेयसे कर्त्तव्ये साक्षात्कार-स्यापि किञ्चित्कर्त्तव्यान्तरमस्तीत्यत आह। न चैव-मिति। [४६।२६] चोद्यसम्भावनाय दृष्टान्तः न च प्राय-

---

परम्पराहेतुत्वे मानाभावः अवश्यापेक्षणीयसाक्षात्कारेणान्यथासिद्ध-त्वादिति वाच्यम्। "श्रोतव्य मन्तव्य" इति श्रुतेर्मननस्य निःश्रेय-सहेतुत्वे सिद्धे तत एव तस्य तद्व्यापारत्वादिति भावः। उभयेति। सम्प्रदायविच्छेदो वातपुत्रीयता च शास्त्रस्येत्युभयमित्यर्थः।

तद्वानिति। हेतुमानित्यर्थः। तेन कारणाभावे कार्या-भावो दर्शित इति भावः। टीकायां क्लेशा मोहरागद्वेषाः। हेतुशून्यं दृष्टान्तमात्रमसाधकमित्याशङ्क्याह। चोद्येति। अनि-जतभोगस्य कर्मणः क्षयो न दृष्ट इति देश्यसम्भावनैव नास्तीति निराकरणार्थमित्यर्थः।

---

(१) पूर्वपक्ष इति २पु० अधिकम्।

श्चित्तेनेवेति । [५०।१] न तावत्प्रायश्चित्तस्याधिकारापत्तिः फलं, आगममन्तरेणाऽदृष्टकर्मणां फलविशेषकल्पनायां प्रमाणाभावात् श्रूयमाणफलत्यागप्रसङ्गाच्च। बलवति बाधके सति नेदमनिष्टमिति चेत् । न । अनन्यथासिद्धस्यागमस्य बाधकसहस्रेणाप्यपनेतुमशक्यत्वात्, शक्यत्वे वा मुरापेयत्वानुमानमपि दुर्निवारमिति हेतुकानां दत्तः स्वहस्तः स्यात् । अत एव न प्रायश्चित्ताचरणदुःखमेव ब्रह्महत्यादीनां फलं तत्फल-

---

दृष्टान्तासिद्धिं निराकर्तुमाह । न तावदिति । एतच्च महापातकप्रायश्चित्तमभिप्रेत्योक्तं तदन्यपापे सत्यनधिकाराभावात् । प्राणान्तिकप्रायश्चित्तेऽधिकारापत्तेरसम्भवाच्चेति मन्तव्यम् । श्रूयमाणेति । पापध्वंसस्य फलत्वेन श्रवणादित्यर्थः । बलवतीति । विमतिपदं कर्म भोगनाश्यं कर्मत्वादिति बाधकबलाच्छ्रूयमाणफलत्यागेऽपि न दोष इत्यर्थः । अनन्यथेति । अनन्यथासिद्धतयाऽऽगमस्यैव बलवत्त्वेनैव बाधितमनुमानमित्यर्थः ।

अत एवेति । यद्यपि विष्णुस्मरणादौ प्रायश्चित्ते न दुःखं किन्त्वानन्द एव तथापि यत्र दुःखमुत्पद्यते तत्परोऽयं ग्रन्थः । तत्फलत्वेनाश्रुतेरिति अत एव प्रायश्चित्तस्य नैमित्तिकत्वमपि निरस्तं नैमित्तिकत्वे फलान्तरकल्पनापत्तेरिति भावः । प्रायश्चित्तेति । अकरणेऽनिष्टाभावादित्यर्थः । ननु तत्फलत्वेनाश्रुता-

त्वेनाश्रुतेः प्रायश्चित्तविधिवैफल्यप्रसङ्गात्, अविशेषाधानाच्च। अनिच्छतोऽपि कर्मवशादेव तत्सिद्धेश्च। तस्मादद्दत्तफलान्येव कर्माणि प्रायश्चित्तेन क्षीयन्त इत्येव साधु। तथा च तद्वदेव तत्त्वसाक्षात्कारोऽपि करिष्यतीत्यर्थः।

अत्र चाऽऽगमबलप्रवृत्ता आगमेनैव बोधयितुं युज्यन्त इत्याशयवानाह। नाभुक्तं क्षीयत इति। [५०।२]

वपि तदेव फलं कल्प्यतामित्यत आह। अविशेषविधानादिति। यद्यविशेषेण दुःखमात्रं ब्रह्महत्यादिकर्मणां फलं विहितं स्यात्तदा प्रायश्चित्ताचरणदुःखमेव तत्फलं कल्प्यत, न त्वेवं, किन्तु विशिष्य घोरनरकस्यैव तत्फलत्वेन विधानादित्यर्थः। अविशेषाधानादिति क्वचित्पाठस्तत्र प्रायश्चित्तविधिवैफल्यानापादको विशेषो न कश्चित्प्रायश्चित्तेनाधीयत इत्यर्थः। अनिच्छतोऽपीति। ननु प्रायश्चित्ताचरणदुःखं ब्रह्महत्यादिफलमितिज्ञानजनन एव प्रायश्चित्तविधेरुपयोगः अन्यथा तज्जन्यदुःखाज्ञाने तत्र निवृत्तिर्न स्यात्। मैवम्। ब्राह्मणं न हन्यादिति निषेधविधेरेव निवृत्तेः सिद्धावात्। प्रायश्चित्तविधिना तादृशदुःखरूपस्याऽफलत्वेनाबोधनात्।

विष्णुस्मरणादिरूपप्रायश्चित्ते दुःखानुत्पत्तेश्चेति भावः। ननु वक्ष्यमाणमनुमानमप्यकृतप्रायश्चित्तानां कर्म्मणां भोगैकनाश्यत्वे मानमस्ति तदुल्लङ्घ्य किमित्यागम उपन्यस्त इत्यत आह। अत्रेति।

ननु—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" (१) इति विपक्षेऽपि स्मृतिरस्ति तत्कथं निर्णयो भविष्यतीत्यत आह। अन्त्यमुखेति। [५०।२] स्यादप्येवं "यदिनाभुक्त"मित्यादिस्मृतेरनुग्राहको न्यायो न स्यात्। अस्ति च तथा। तथा च प्रयोगः विवादाध्यासितानि कर्माणि भोगादेव क्षीयन्ते अक्षीणप्रायश्चित्तकर्मत्वात् आरब्धशरीरकर्मवत्। न चास्याऽऽगमविरोधः तस्यागमान्तरविरोधेनानिर्णायकत्वादित्यर्थः।

न चौत्सर्गिमद्वायाः स्मृतेरस्ति बाधके ऽन्यथाभावो युज्यत इत्याशयवानाह। औत्सर्गिकस्येति। [५०।३]

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा"

इत्यागमो भोगं विनैव ज्ञानस्य कर्मनाशकत्वबोधकोऽस्तीत्यर्थः। ननु "नाभुक्त"मिति स्मृतित एव कर्मणां भोगैकनाश्यत्वेऽवधृते किं विरोधवर्णनेनेत्यत आह। नन्विति। विवादाध्यासितानीति यथाश्रुतस्यागमकत्वादाह। स्यादेवमिति। विवादाध्यासितानीति। अत्रैवकारः स्पष्टार्थ इत्येके। भोगाममवहितकारणान्तरव्यावृत्तिपर इत्यन्ये। नन्वौत्सर्गिकत्ववचनं प्रकृतविरोधि औत्सर्गिकत्वस्यैव बाध्यत्वप्रयोजकत्वादित्यत आह। न

(१) भगवद्गीता अ० ४ श्लो० ३७।

ननु—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" (१)

इति श्रुतौ परिपन्थिन्यां कथमुच्यते ऽमति बाधक इति, कथञ्च तद्विरोधेन स्मृतेर्निर्णायकत्वं अनुमानानुग्रहोऽपीत्यत आह । क्षीयन्त इति । [५०।४]

चेति । कथं चेति । श्रुतेः स्मृत्युपजीव्यतया बलवत्वात्तद्विरोधेन स्मृत्यप्रामाण्यादितिभावः ।

नन्वेकेनागमेनागमान्तरप्रतिरोधवदनुमानस्यापि प्रतिरोधोऽस्तु, एकेनैव भूयसामपि प्रतिबन्धात् गमकतोपयिकरूपस्यैव बलतया भूयस्त्वस्याऽबलवत्वात् । नैशमेनो व्यपोहतीत्यादिस्मृतेः सन्ध्योपासननाश्यकर्मभिः कीर्त्तननाश्यकर्मभिश्च व्यभिचारः ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाप्रयोजकत्वं शब्दबोधितनाशकानाश्यत्वं चोपाधिः प्रायश्चित्तपदस्य भोगान्यादृष्टनाशकपरत्वे च तत्त्वज्ञानस्यापि भोगान्यादृष्टनाशकत्वेन हेतोरसिद्धिः । अथ कायव्यूहादिना दृष्टभोगेनैव कर्मक्षयस्य कथञ्चिदुपपत्तौ न तत्त्वज्ञानस्य साक्षान्नाशकत्वमत्यन्तादृष्टं कल्प्यते । न । आगमिकत्वेन तस्याकल्पनात् । तत्रागमस्य तात्पर्य्यं न कल्पत इति चेत् सत्यं योग्यसाकाङ्क्षसन्निहितान्वितार्थपरत्वस्य व्युत्पत्तिकाल एव कृप्त-

---

(१) मुण्डकोपनिषत् । २ । २ । ८ ।

न हीयं श्रुतिरदत्तफलानामेव कर्मणां तत्त्वज्ञानात् क्षयमाह, किन्तु क्षयमात्रं, तच्चोपभोगेनापि भवन्न किञ्चिद्विरुणद्धीति भावः ।

त्वात् । भोगव्यापारद्वारैव कर्मनाशकत्वं ज्ञानस्यास्त्विति चेत् । न । तद्बहिर्भावेनैव सामग्र्यां क्लृप्ते तदधिकप्रवेशस्य तद्ग्राहकमानविरुद्धत्वात् । न च तावदेवास्य चिरमिति श्रुतिबलादवान्तरजात्यादिकल्पनया तदुपपादनीयम् । श्रुतेः कर्मणां भोगैकनाश्यत्वप्रतिपादकत्वाभावात् । शेषादिना च पूरणे तत्प्रतिपादकत्वे मानाभावात् । अथ ज्ञानाग्निः सर्वकर्माणीति सर्वपदस्याकृतप्रधानाङ्गापूर्वपरत्वं अन्यथापि तस्य कर्ममात्रपरत्वे कार्त्स्न्यपरत्वाभावादिति भिन्नविषयत्वादागमस्य न बाधकत्वम् । न हि तेषां प्रायश्चित्तं नाशकं विहितैकदेशत्वात् । न फलं तदजननात् । नापि न नश्यन्त्येव उत्पत्तिविरोधात् । अनिर्मोक्षापाताच्च । नाशकान्तरस्य चाक्लृप्तत्वादिति । तन्न । प्रधानापूर्वार्थतया क्लृप्तानां तेषां तदनुत्पादे तत्सामग्र्यसिद्धेः । सामान्यतस्तत्कल्पने ऽपि विशेषस्यासिद्धौ तदसिद्धिरेव । अथ भस्ममात्यदस्य लाक्षणिकत्वेन यथा वह्नेः परम्परया भस्म तथा ज्ञानात् परम्परया कर्मक्षयः प्रतीयते । एवं च परम्पराघटको भोग एवान्यत्र कर्मनाशकत्वे ज्ञानस्यानाशकत्वेन क्लृप्तत्वादित्यबाधे सम्भवति न बाधकल्पना प्रायश्चित्तविधेरनन्यथासिद्धत्वात्तद्बाधोऽस्त्विति मतम् । तन्न । कर्मणो भोगनाश्यत्वे ज्ञानस्यानाशकत्वापत्तेः । न हि

देहेषूपभोगो—देहोपभोगः। अपि च विपरीता-ऽपि श्रुतिर्विद्यत इत्याह। तावदेवेति। [५०।५] अस्य-तत्त्वसाक्षात्कारवतः। तावदेव चिरं-विलम्बः। यावन्न विमोक्ष-उपात्तकर्मराशेः सकाशात्फलोपभोगेन। अथ-तस्मिन् सति। सम्पत्स्यते-कैवल्येनेत्यर्थः। "भोगेन त्वितरे क्षपयित्वा" इतिवाक्यशेषात्।

ननु भोगेन प्रक्षयो ऽनुपपन्न एव, कर्मराशेरनन्त-तयाऽनियतविपाकसमयतया चेत्यत आह। योग-

---

भोगस्तत्त्वज्ञानव्यापारः भोगमात्रस्यैव कर्मनाशकत्वे सामर्थ्यान्न नाशककोटौ ज्ञानस्यान्तर्भावः व्यभिचारात्। तस्मात्कर्मप्राग-भावासहवृत्तिकर्मनाशे युगपद्भोगे वा न व्यभिचार इत्यबाधार्थं भोग एव तद्व्यापारः कल्प्यते। अत एवानुमाने ऽपि नागमबाधा-प्रयोजकत्वेनाप्युपाधिः श्रुतिवाक्यशेषे च न मानाभावः। उत्पन्न-तत्त्वज्ञानस्यापवर्गो विलम्बस्योक्तस्योपपादनार्थमुक्तरीत्या भोगस्यै-वाक्षेपात्। उपनिषदि श्रूयत एव वाक्यशेषः टीकाकृता ऽनभि-धानमात्रान्न तदभाव इत्यभिप्रायकोऽयं ग्रन्थः॥

श्रुताविति। "श्रुतिस्मृतिविरोधे हि श्रुतिरेव बलीयसी" श्रुते-स्तदुपजीव्यत्वादित्यर्थः। देहस्यैवोपभोक्तृत्वमिति भ्रमनिरासायाह देहेष्विति। सति सप्तमी।

ननु तत्त्वज्ञानवत्त्वं तादृशत्वं तच्च स्वपदोपात्तमेवेति तादृश

र्द्धीति। [५०।६] उक्तं-आदिवाक्ये। शङ्कते। न चेति। [५०।८]

अयमाशयः—यदि तावत्कर्मणामेवायं महिमा, यदेकदैव नानाविधदेहाद्यनेकव्यापारैस्तैस्तैरुपभोगः साध्यः? किं योगप्रभावपरिकल्पनया। अथ नैष महिमा तेषां? तथापि क्व योगप्रभावस्योपयोगः नहीश्वरोऽपि कर्मणां स्वभावं विपर्यासयितुमर्हति। तस्मात् स्वप्रतिभया कल्पनीयमेतत्। एवं चेद्वरमदृत्तफलान्येव योगप्रभावात् क्षीयन्त इति कल्प्यतां लाघवायेति। परिहरति। दृष्टानुसारेणेति। [५०।१०]

प्रमाणानुसारेण यथाह्युपभोगादेव कर्मणां क्षयः देहादिषु सत्स्वेव भोगो लब्धवृत्तिभिरेव कर्मभिर्देहादिसम्भवः, सहकारिलाभ एव तेषां वृत्तिलाभः, ते च सहकारिणः क्वचित्फलोन्नेयाः यथा युगपदनेकेन्द्रियग्रहे, क्वचिदागमगम्या यथा वासुदेवसौभरिप्रभृतीनां काययौगपद्य इति सर्वत्र प्रमाणमस्ति, नैवमनुपभुक्तकर्मक्षये। यथा च महाप्रलये सर्वकर्मणामेकदैव वृत्तिनिरोध आगमप्रामाण्यादास्थीयते तथा योगर्द्धिकालेऽपि सर्वेषां वृत्तिलाभ आस्थेय आगमप्रामाण्या-

देवेति न किञ्चित् स्वप्रतिभामात्रेण कल्पितमित्यर्थः । तादृशश्च मुनिरपरनिःश्रेयसवानित्यर्थः । किमतो यद्येवमित्यत आह। इति न वातपुत्रीयमिति । [५०।१३]

अथ परं निःश्रेयसं कीदृशमित्यत आह। परन्विति। [५०।१३] इत्युपपन्नं निःश्रेयसद्वैविध्यमिति [५०।१५] पूर्वपक्षनिराकरणायेतिशेषः। न सुखदुःखतया मनुते रागद्वेषप्रसवहेतुत्वाभावादित्यर्थः ।

न ह्यस्ति सम्भवो न तत्र तृप्यति तच्च तस्य सुखं यादृशमज्ञानिनस्तृष्णाजनकं, न यद्द्वेष्टि तच्च तस्य दुःखमिति यादृशमज्ञानिनो द्वेषजनकमित्यर्थः । उक्तं तात्पर्यमक्षरार्थीकर्तुं समर्थितमेव शङ्कते । स्यादेतदिति । [५०।१६]

इति व्यर्थमित्यत आह। अपरेति। ननु निःश्रेयसद्वैविध्यं नात्र सूत्रार्थ इति तदुपपादनमनुपयुक्तमित्यत आह। पूर्वपक्षेति। ननु सर्वज्ञः सुखदुःखे न तु तत्तया जानातीति विरोध इत्यत आह रागेति। स्वरागाद्युत्पादकतया न मनुत इत्यर्थः। ननु तृष्णाया अभावे ऽपि सुखं सुखं सुखमेवेत्यत आह। यादृशमिति।

उक्तमिति। तादृशश्च मुनिः शास्त्रस्य प्रणेतेत्यनेन।

ननु कर्मसामर्थ्यादेव भोगसद्भावात् किं तदर्थकेन यत्नेनेत्यत

उपभोगप्रयत्न आस्थेयो मोक्षाय त्वरमाणेनापि कायव्यूहादाविति शेषः । यस्तु न त्वरते यदा भविता कर्मक्षयस्तदा भविता मोक्षः किन्त्वरया ? प्राप्ता तावन्निरपाया भूमिरिति समर्थितहृदयस्तस्य तु निःश्रेयसद्वययौगपद्यशङ्कापि नास्तीतिभावः ।

(इति परापरयोर्निःश्रेयसयोः साक्षात्परम्परया च तत्त्वज्ञानस्य हेतुत्वकथनम् ।)

नन्वेतावतैव सर्वं सुस्थं किमुत्तरप्रबन्धेनेत्यत आह । तदेवमर्थगतिमिति । [५।१।३]

मिथ्याज्ञानदोषप्रवृत्तीनां-प्रवाहरूपाणामिति बोद्ध-

आह । मोक्षायेति । यद्यपि त्वरमाणस्यापि कायव्यूहवतो भोगात्कर्मक्षये सत्येव मोक्ष इति न ततो विशेष उक्तः तथापि क्रमिकभोगात्कर्मक्षयमभिप्रेत्योक्तम् । यस्त्विति ।

(इति परापरनिःश्रेयसयोः साक्षात्परम्परया च तत्त्वज्ञानस्य हेतुत्वकथनम् ।)

ननु संसारेऽपि मिथ्याज्ञानाद्युच्छेदेन ततो जीवन्मुक्तौ विशेषः स्यादित्यत आह । प्रवाहरूपाणामिति । कारणरूपा धर्माधर्म-

व्यम्। प्रवृत्तिश्चात्र कारणरूपा ग्राह्या, कार्यरूपाया अनुच्छेदात्। जन्मदुःखयोः प्रवाहरूपयोरुच्छेदक्रमो नास्ति। कुतः? पूर्वोपात्तस्येति। [५१।५] मूलानुच्छेदादित्यर्थः।

आगामिवार्त्तिकविरोधं परिहरन्नाह। इदञ्चेति।[५१।७]।

यद्यपि दुःखादीनामेकार्थसमवायलक्षणोऽपि योगः सम्भवति, तथापि शरीरादेर्जन्मनः स नास्ति, कार्यकारणभावस्तु तस्यापीति स एव ग्राह्य इत्याह। योग्यत-

---

हेतुप्रयत्नरूपा। कार्यरूपा धर्माधर्मात्मिका। ननु जन्मदुःखोच्छेदक्रमो नास्तीति साध्ये यथोक्तो हेतुरपक्षधर्म इत्यत आह। कुत इति। तथा च योगी तत्त्वसाक्षात्कारकाले जन्मादिप्रागभाववान् धर्माधर्मवत्त्वात् इत्यर्थः।

स नास्तीति। एकनिवृत्तावन्यानिवृत्त्युपयोगीति शेषः, कार्यकारणभावस्यैव तथात्वात्। वस्तुतस्त्वात्मनो जन्म निषिध्यते तच्चात्मनो मनसा संयोग इति तस्याप्येकार्थसमवायोऽस्त्येवेति भावः। योग्यतयेति। इतरेतरयोगद्वन्द्वे पदार्थानां साहित्यमेकधर्मान्वयरूपं प्रतीयते तच्चैकनिवृत्तावन्यनिवृत्त्युपयोगी कार्यकारणभाव एवेत्यर्थः। यद्यपि व्याप्यव्यापकभावोऽपि सम्बन्धस्तादृशो भवत्येव, न च कार्यकारणभाव एव तस्याप्युपजीव्य इति स एवोक्त इति वाच्यम्। तदभावेऽपि रूपरसयोर्व्याप्तेः। तथापि प्रकृते दुःखादीनां